ॐ

अथर्ववेदीया

मुण्डकोपनिषत्[1]

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः ॥

ॐ शान्तिः शान्तिः शान्तिः

ॐ ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥ १ ॥ ५

श्रीमच्छङ्करभगवत्पादाचार्यविरचितं भाष्यम्

[2]ॐ ब्रह्मा देवानामित्याद्याथर्वणोपनिषत् । अस्याश्च विद्यासम्प्रदायकर्तृत्वपारम्पर्यलक्षणसम्बन्धमादावेवाऽऽह स्वयमेव स्तुत्यर्थम्; एवं हि महर्द्धिः परमपुरुषार्थसाधनत्वेन गुरुणाऽऽयासेन लब्धा विद्येति । श्रोतृबुद्धिप्ररोचनाय

श्रीमदानन्दगिर्याचार्यकृता टीका

यदक्षरं परं ब्रह्म विद्यागम्यमितीरितम् । यस्मिन् ज्ञाते भवेज्ज्ञातं सर्वं तत्स्यामसंशयम् ॥ १ ॥ १०

ब्रह्मोपनिषद्गर्भोपनिषदाद्या अथर्वणवेदस्य बह्व्यश्च उपनिषदः सन्ति । तासां शारीरकेऽनुपयोगित्वेनाव्याचिख्यासितत्वाददृश्यत्वादिगुणको धर्मोक्तेरित्याद्यधिकरणोपयोगितया मुण्डकस्य व्याचिख्यासितस्य प्रतीकमादत्ते—**ब्रह्मा देवानामित्याद्याथर्वणोपनिषदिति।** व्याचिख्यासितेति शेषः । नन्वियमुपनिषन्मन्त्ररूपा मन्त्राणां चेषे त्वेत्यादीनां कर्मसम्बन्धेनैव प्रयोजनवत्त्वम् । एतेषां च मन्त्राणां कर्मसु विनियोजकप्रमाणानुपलम्भेन तत्सम्बन्धासम्भवान्निष्प्रयोजनत्वाद्व्याचिख्यासितत्त्वं न सम्भवतीति शङ्कमानस्योत्तरम् । सत्यं, कर्मसम्बन्धाभावेऽपि ब्रह्मविद्याप्रकाशन- १५
सामर्थ्याद्विद्यया सम्बन्धो भविष्यति । ननु विद्यायाः पुरुषकर्तृकत्वात्तत्प्रकाशकत्वेऽस्या उपनिषदोऽपि पौरुषेयत्वप्रसङ्गात्पाक्षिकपुरुषदोषजत्वशङ्क्याऽप्रामाण्याद्व्याचिख्यासितत्वं नोपपद्यत इत्याशङ्क्याऽऽह—**अस्याश्चेति।** विद्यायाः सम्प्रदायप्रवर्तका एव पुरुषा न तूत्प्रेक्षया निर्मातारः । सम्प्रदायकर्तृत्वमपि नाधुनातनं येनानाश्वासः स्यात् । किंत्वनादिपारम्पर्यागतम् । ततोऽनादिप्रसिद्धब्रह्मविद्याप्रकाशनसमर्थोपनिषदः पुरुषसम्बन्धः सम्प्रदायकर्तृत्वपारम्पर्यलक्षण एव तमादावेवाऽऽहेत्यर्थः । विद्यासम्प्रदायकर्तृत्वमेव पुरुषाणां यथा विद्यायाः पुरुषसम्बन्धस्तथैवोप- २०
निषदोऽपि । यदि पुरुषसम्बन्धो विवक्षितः, पौरुषेयत्वपरिहाराय तर्हि तथाभूतसम्बन्धाभिधायकेनान्येन भवितव्यं स्वयमेव स्वसम्बन्धाभिधायकत्वे [3]स्ववृत्तिप्रसङ्गादित्याशङ्क्याऽऽह—**स्वयमेव स्तुत्यर्थमिति ।** विद्यास्तुतौ तात्पर्यान्न

---

१. यद्यपि प्रश्नानन्तरं मुण्डकोपनिषदन्यत्र मुद्रिता । प्राचीनश्लोके च ईशकेनकठप्रश्नमुण्डकेति क्रमो वर्तते तथापि प्रश्नस्य मुण्डकव्याख्यारूपत्वादस्मिन् संस्करणे मन्त्ररूपमुण्डकस्यादौ निवेशः कृतः । अयमेव क्रमो युक्तः । मन्त्रपठननान्तरमेव तद्व्याख्यारूपब्राह्मणपठनात् । २५

२. आरम्भे ओमिति मङ्गलार्थम् ।

३. स्ववृत्तिप्रसङ्गात् आत्माश्रयेत्यर्थः । यथा सुशिक्षितोऽपि नटः स्वस्कन्धमारोढुं स्वस्मिन् वर्तितुमशक्तस्तथात्र "कस्मिन्नु भगवो विज्ञाते" इत्यारभ्य प्रवृत्तब्रह्मविद्यायाः ब्रह्माऽऽदयः प्रवर्तकाः । तेषामत्र पठने के प्रवर्तका? इति प्रश्ने स्वयमेवेति वक्तव्यं यथा "स्वाध्यायोऽध्येतव्य" इति विधिः स्वस्वेतरसकलवेदाध्ययने प्रवर्तयति । एतद्विधौ किं प्रवर्तकमिति पृष्टे स्वयमेवेति वक्तव्यं तथाचागतं स्वस्यैव स्वप्रवर्त- ३०
कत्वरूपं स्ववृत्तित्वम् । एवमत्र स्वसिद्ध्यधीनसिद्धिकत्वं स्ववृत्तिः पुरुषसम्बन्धाभिधानप्रामाण्यमुपनिषत्प्रामाण्ये सति निर्वहति । उपनिषत्प्रामाण्यं ब्रह्मादिसम्प्रदायकर्तृप्रोक्तत्वे सति भवतीत्यात्माश्रय इत्यर्थः । विद्यास्तुतावस्य तात्पर्यं न तु प्रामाण्ये, अतो न दोषः ।

विद्यां महीकरोति। स्तुत्या प्ररोचितायां हि विद्यायां सादराः प्रवर्तेरन्निति। प्रयोजनेन तु विद्यायाः साध्यसाधनलक्षण-सम्बन्धमुत्तरत्र वक्ष्यति—"भिद्यते हृदयग्रन्थिः" इत्यादिना। अत्र चापरशब्दवाच्यायामृग्वेदादिलक्षणायां विधि-प्रतिषेधमात्रपरायां विद्यायां संसारकारणाविद्यादिदोषनिवर्तकत्वं नास्तीति स्वयमेवोक्त्वा परापरविद्याभेदकरण-पूर्वकमविद्यायामन्तरे वर्तमाना इत्यादिना तथा परप्राप्तिसाधनं सर्वसाधनसाध्यविषयवैराग्यपूर्वकं गुरुप्रसादलभ्यां ब्रह्मविद्यामाह—परीक्ष्य लोकानित्यादिना। प्रयोजनं चासकृद्ब्रवीति ब्रह्म वेद ब्रह्मैव भवतीति। परामृताः परिमुच्यन्ति सर्व इति च। ज्ञानमात्रे यद्यपि सर्वाश्रमिणामधिकारस्तथाऽपि संन्यासनिष्ठैव ब्रह्मविद्या मोक्षसाधनं न कर्मसहितेति भैक्षचर्यां चरन्तः संन्यासयोगादिति च ब्रुवन्दर्शयति। विद्याकर्मविरोधाच्च। न हि ब्रह्मात्मैकत्वदर्शनेन सह कर्म स्वप्नेऽपि सम्पादयितुं शक्यम्। विद्यायाः कालविशेषाभावादनियतनिमित्तत्वात्कालसङ्कोचानुपपत्तिः। यत्तु गृहस्थेषु

स्ववृत्तिर्दोष इत्यर्थः। स्तुतिर्वा किमर्थेत्यत आह—**श्रोतृबुद्धीति**। [१]प्रवर्तेरन्निति पाठो युक्तः। 'वृतु'धातोरात्मने-पदित्वात्। विद्याया यत्प्रयोजनं तदेवास्या उपनिषदोऽपि प्रयोजनं भविष्यतीत्यभिप्रेत्य विद्यायाः प्रयोजनसम्बन्ध-माह—**प्रयोजनेन त्विति**। संसारकारणनिवृत्तिर्ब्रह्मविद्याफलं चेत्तर्ह्यपरविद्ययैव तन्निवृत्तेः सम्भवान्न तदर्थं ब्रह्म-विद्याप्रकाशकोपनिषद्व्याख्यातव्येत्याशङ्क्याऽऽह—**अत्र चेति**। संसारकारणमविद्यादिदोषस्तन्निवर्तकत्वमपरविद्यायाः कर्मात्मिकाया न सम्भवत्यविरोधात्। न हि शतशोऽपि प्राणायामं कुर्वतः शुक्तिदर्शनं विना तदविद्यानिवृत्ति-र्दृश्यते। ततोऽपरविद्यायाः संसारकारणाविद्यानिवर्तकत्वं नास्तीति स्वयमेवोक्त्वा ब्रह्मविद्यामाहेति सम्बन्धः। किञ्च परमपुरुषार्थसाधनत्वेन **ब्रह्मविद्यायाः** परविद्यात्वं निकृष्टसंसारफलत्वेन च कर्मविद्याया अपरविद्यात्वम्। ततः [२]समाख्याबलादपरविद्याया मोक्षसाधनत्वाभावोऽवगम्यत इत्यभिप्रेत्याऽऽह—**परापरेति**। **यच्चाऽऽहुः कर्मजडाः** केवल-ब्रह्मविद्यायाः कर्तृसंस्कारत्वेन कर्माङ्गत्वात्स्वातन्त्र्येण पुरुषार्थसाधनत्वं नास्तीति तदनन्तरश्रुत्यैव निराकृतमित्याह—**तथा परप्राप्तिसाधनमिति**। ब्रह्मविद्यायाः कर्माङ्गत्वे कर्मणो निन्दा न स्यात्। न खल्वङ्गविधानाय प्रधानं विनिन्द्यते अत्र तु सर्वसाध्यसाधननिन्दया तद्विषयवैराग्याभिधानपूर्वकं परप्राप्तिसाधनं ब्रह्मविद्यामाह—अतो ब्रह्मविद्यायाः स्वप्रधानत्वात्तत्प्रकाशकोपनिषदां न कर्तुः स्तावकत्वमित्यर्थः। यद्युपनिषदां स्वतन्त्रब्रह्मविद्याप्रकाशकत्वं स्यात्तर्हि तदध्येतॄणां सर्वेषामेव किमिति ब्रह्मविद्या न स्यादित्याशङ्क्याह—**गुरुप्रसादलभ्यामिति**। गुर्वनुग्रहादिसंस्कारा-भावात्सर्वेषां यद्यपि न भविष्यति तथाऽपि विशिष्टाधिकारिणां भविष्यतीति भावः। ननु स्वतन्त्रा चेद्ब्रह्मविद्या तर्हि प्रयोजनसाधनं न स्यात्। सुखदुःखप्राप्तिपरिहारयोः प्रवृत्तिनिवृत्तिसाध्यतावगमात्तत्राऽऽह—**प्रयोजनं चेति**। स्मरणमात्रेण विस्मृतसुवर्णलाभे सुखप्राप्तिप्रसिद्धेः रज्जुतत्त्वज्ञानमात्राच्च सर्पजन्यभयकम्पादिदुःखनिवृत्तिप्रसिद्धेश्च न प्रवृत्तिनिवृत्तिसाध्यत्वं प्रयोजनस्यैकान्तिकम्। अतो विश्रब्धं श्रुतिः प्रयोजनसम्बन्धं विद्याया असकृद्ब्रवीति। तस्मात्तत्प्रकाशकोपनिषदो व्याख्येयत्वं सम्भवतीत्यर्थः। [३]**यच्चाऽऽहुरेकदेशिनः** स्वाध्यायाध्ययनविधेरर्थावबोधफलस्य त्रैवर्णिकाधिकारत्वादधीतोपनिषज्जन्ये ब्रह्मज्ञानेऽस्त्येव सर्वेषामधिकारः। ततः सर्वाश्रमकर्मसमुच्चितैव ब्रह्मविद्या मोक्षसाधनमिति तत्राऽऽह—**ज्ञानमात्र इति**। सर्वस्वत्यागात्मकसंन्यासनिष्ठैव परब्रह्मविद्या मोक्षसाधनमिति वेदो दर्शयति। तादृशसंन्यासिनां च कर्मसाधनस्य स्वस्याभावान्न कर्मसम्भवः। आश्रमधर्मोऽपि शमदमाद्युपबृंहित-विद्याभ्यासनिष्ठत्वमेव। तेषां शौचाचमनादिरपि तत्त्वतो नाऽऽश्रमधर्मो लोकसंग्रहार्थत्वात्। ज्ञानाभ्यासेनैवापावनत्व-निवृत्तेः। "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" इति स्मरणात्। त्रिषवणस्नानविध्यादेरज्ञसंन्यासिविषयत्वात्। अतः कर्मनिवृत्त्यैव साहित्यं ज्ञानस्य न कर्मणेत्यर्थः। इतश्च न कर्मसमुच्चिता विद्या मोक्षसाधनमित्याह—**विद्या-कर्मविरोधाच्चेति**। अकर्तृ ब्रह्मैवास्मीति करोमि चेति स्फुटो व्याघात इत्यर्थः। यदा ब्रह्मात्मैकत्वं विस्मरति तदोत्पन्नविद्योऽपि करिष्यति ततः समुच्चयः सम्भाव्यत इति न वाच्यमित्याह—**विद्याया इति**। ननु गृहस्थाना-

---

१. प्रवर्तेयुरिति पाठं दृष्ट्वेदमुक्तम्।

२. समाख्या—अपरविद्येति यौगिकः शब्दः, तत्रापरत्वं विद्याया मोक्षापेक्षया न्यूनफलकत्वम्।

३. एकदेशिनो भास्करादयः, अधीतेन स्वाध्यायेन प्रयोजनवदर्थज्ञानं सम्पादयेदिति मीमांसकैरुक्तः। केवल-वेदस्य निष्प्रयोजनत्वात् अनुष्ठानद्वारा स्वर्गादिसाधनमर्थज्ञानमेवोद्दिश्यं तथा च वेदान्तानां वेदत्वात् तदर्थज्ञानं सर्वैः त्रैवर्णिकैः प्रयोजनान्तरमनुद्दिश्यैव सम्पादनीयमित्यर्थः।

ब्रह्मविद्यासम्प्रदायकर्तृत्वादि लिङ्गं न तत्स्थितन्यायं बाधितुमुत्सहते। न हि विधिशतेनापि तमःप्रकाशयोरेकत्र सद्भावः शक्यते कर्तुं किमुत लिङ्गैः केवलैरिति। एवमुक्तसम्बन्धप्रयोजनाया उपनिषदोऽल्पाक्षरं ग्रन्थविवरणमारभ्यते। [1]य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं वा ब्रह्म गमयत्यविद्यादिसंसारकारणं चात्यन्तमवसादयति विनाशयतीत्युपनिषत्। उपनिपूर्वस्य सदेरेवमर्थस्मरणात्।

ब्रह्मा परिबृढो महान्धर्मज्ञानवैराग्यैश्वर्यैः सर्वानन्यानतिशेत इति। देवानां द्योतनवतामिन्द्रादीनां प्रथमो गुणैः प्रधानः सन्प्रथमोऽग्रे वा सम्बभूवाभिव्यक्तः सम्यक्[2]स्वातन्त्र्येणेत्यभिप्रायः। न तथा यथा धर्माधर्मवशात्संसारिणोऽन्ये जायन्ते। "योऽसावतीन्द्रियोऽग्राह्यः" इत्यादिस्मृतेः। विश्वस्य सर्वस्य जगतः कर्तोत्पादयिता। भुवनस्योत्पन्नस्य गोप्ता पालयितेति विशेषणं ब्रह्मणो विद्यास्तुतये। स एवं प्रख्यातमहत्त्वो ब्रह्मा ब्रह्मविद्यां ब्रह्मणः परमात्मनो विद्यां ब्रह्मविद्याम् 'येनाक्षरं पुरुषं वेद सत्यम्' इति विशेषणात्परमात्मविषया हि सा। ब्रह्मणा वाऽग्रजेनोक्तेति ब्रह्मविद्या। तां [3]सर्वविद्याप्रतिष्ठां सर्वविद्याभिव्यक्तिहेतुत्वात्सर्वविद्याश्रयामित्यर्थः। सर्वविद्यावेद्यं वा वस्त्वनयैव विज्ञायत इति।

मङ्किरःप्रभृतीनां विद्यासम्प्रदायप्रवर्तकत्वदर्शनाद्गृहस्थाश्रमकर्मभिः समुच्चयो लिङ्गादवगम्यत इत्याशङ्क्याऽऽह—**यस्त्विति**। [4]लिङ्गस्य न्यायोपबृंहितस्यैव गमकत्वाङ्गीकारात्समुच्चये च न्यायाभावात्प्रत्युत विरोधदर्शनान्न लिङ्गेन समुच्चयसिद्धिः। सम्प्रदायप्रवर्तकानां च गार्हस्थ्यस्या[5]ऽऽभासमात्रत्वात्तत्त्वानुसन्धानेन मुहुर्मुहुर्बाधात्।

[6]"यस्य मे चास्ति सर्वत्र यस्य मे नास्ति किञ्चन। मिथिलायां प्रदीप्तायां न मे किञ्चन दह्यते॥"

इत्युद्गारदर्शनात्कर्माभासेन न समुच्चयः स्यात्तत्र च विधिर्न दृश्यत इति भावः। साधितं व्याख्येयत्वमुपसंहरति—**एवमिति**। ग्रन्थे कथमुपनिषच्छब्दप्रयोग इति शङ्कायामुपनिषच्छब्दवाच्यविद्यार्थत्वाल्लाक्षणिक इति दर्शयितुं विद्याया उपनिषच्छब्दार्थत्वमाह—**य इमामिति। आत्मभावेनेति**। प्रेमास्पदतयेत्यर्थः। अनर्थपूगं क्लेशसमूहं निशातयति शिथिलीकरोत्यपरिपक्वज्ञानाद्द्वित्रैर्जन्मभिर्मोक्षसम्भवादित्यर्थः।

"ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम्॥"

इति स्मरणाद्धर्मज्ञानवैराग्यैश्वर्यैः सर्वानन्यानतिक्रम्य वर्तत इति परिबृढत्वं सिद्धमित्यर्थः।

---

१. य इमामिति—'षद्लृ' विशरणगत्यवसादनेषु इत्युक्तेः क्रमेणार्थत्रयमपि ब्रह्मविद्यायां योजयति।

२. स्वातन्त्र्येण—न कर्मवश्यतया, आधिकारिकपुरुषो ब्रह्मा, स च स्वातन्त्र्येण गृहादिव गृहान्तरं शरीराणि गच्छति।

३. अत्र विशिष्टाद्वैतिनः सर्वविद्याप्रतिष्ठां सर्वविद्याश्रयां ज्ञातव्ये ब्रह्मणि कृत्स्नज्ञातव्यान्तर्भावात् ब्रह्मज्ञाने कृत्स्नविषयज्ञानानि अन्तर्भूतानीत्यर्थः इत्यूचुः (श्रुत. प्र) तथापि ब्रह्मशरीरभूतचिदचितोः प्रत्येकविशेषज्ञानाभावादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्तिः। अस्मन्मते तु ब्रह्मणि ज्ञाते सर्वस्यापि तत्त्वतो ज्ञातत्वात् ज्ञातव्यान्तराभावात् सर्वविद्यापरिसमाप्तिरेव ब्रह्मज्ञाने सति।

माध्वास्तु—सर्वविद्यासाफल्यहेतुः इति व्याचक्रुः। तत् ब्रह्मविद्यां विनापि लौकिकविद्यायाः फलदर्शनात् चिन्त्यम्।

४. केवलं लिङ्गमर्थवादगतत्वसंशयाक्रान्तं न श्रुतिकल्पकमतो न्यायोऽप्यपेक्षितः, विरोधदर्शनात्न समुच्चयप्राप्तिः, अत एवात्र न्यायाभावः।

५. आभासमात्रत्वात् तेषां जनकादीनां गार्हस्थ्यं आभास एव प्रतिभासमात्रं न तु वास्तविकम्। तत्र गमकमाह—"यस्य मे नास्ती"ति। श्रीजनकमहाराजस्येदं वचनं विषयेषु मम सङ्गो नास्ति, असङ्गोऽहमित्यर्थः।

६. "अनन्तं बत मे वित्तं यस्य मे नास्ति किञ्चन। मिथिलायां प्रदीप्तायां न मे किञ्चन दह्यते॥" इति श्रीभीष्मेणानूदितम्—अत्र नीलकण्ठी टीका—अनन्तं देशकालवस्तुपरिच्छेदरहितं वित्तमिव गूढं कोशपञ्चकलक्षणगुहास्थं प्रत्यक्त्वमेव मे स्वरूपम्। अत एव सर्वस्य मदनन्यत्वात् रज्जुसर्पवत् मायि कल्पितत्वाच्च मे मम न किञ्चन। तदाह—मिथिलायामिति। न हि अध्यस्तदोषैः अधिष्ठानं स्पृश्यते।

(महाभारते शान्तिपर्वणि १७७ सर्गे)

विद्यां महीकरोति। स्तुत्या प्ररोचितायां हि विद्यायां सादराः प्रवर्तेरन्निति। प्रयोजनेन तु विद्यायाः साध्यसाधनलक्षण-सम्बन्धमुत्तरत्र वक्ष्यति—"भिद्यते हृदयग्रन्थिः" इत्यादिना। अत्र चापरशब्दवाच्यायामृग्वेदादिलक्षणायां विधि-प्रतिषेधमात्रपरायां विद्यायां संसारकारणाविद्यादिदोषनिवर्तकत्वं नास्तीति स्वयमेवोक्त्वा परापरविद्याभेदकरण-पूर्वकमविद्यायामन्तरे वर्तमाना इत्यादिना तथा परप्राप्तिसाधनं सर्वसाधनसाध्यविषयवैराग्यपूर्वकं गुरुप्रसादलभ्यां ब्रह्मविद्यामाह—परीक्ष्य लोकानित्यादिना। प्रयोजनं चासकृद्ब्रवीति ब्रह्म वेद ब्रह्मैव भवतीति। परामृताः परिमुच्यन्ति सर्व इति च। ज्ञानमात्रे यद्यपि सर्वाश्रमिणामधिकारस्तथाऽपि संन्यासनिष्ठैव ब्रह्मविद्या मोक्षसाधनं न कर्मसहितेति भैक्षचर्यां चरन्तः संन्यासयोगादिति च ब्रुवन्दर्शयति। विद्याकर्मविरोधाच्च। न हि ब्रह्मात्मैकत्वदर्शनेन सह कर्म स्वप्नेऽपि सम्पादयितुं शक्यम्। विद्यायाः कालविशेषाभावादनियतनिमित्तत्वात्कालसङ्कोचानुपपत्तिः। यत्तु गृहस्थेषु

स्ववृत्तिर्दोष इत्यर्थः। स्तुतिर्वा किमर्थेत्यत आह—**श्रोतॄबुद्धीति**। [1]प्रवर्तेरन्निति पाठो युक्तः। 'वृतु'धातोरात्मने-पदित्वात्। विद्याया यत्प्रयोजनं तदेवास्या उपनिषदोऽपि प्रयोजनं भविष्यतीत्यभिप्रेत्य विद्यायाः प्रयोजनसम्बन्ध-माह—**प्रयोजनेन त्विति**। संसारकारणनिवृत्तिर्ब्रह्मविद्याफलं चेत्तर्ह्यपरविद्ययैव तन्निवृत्तेः सम्भवान्न तदर्थं ब्रह्म-विद्याप्रकाशकोपनिषद्व्याख्यातव्येत्याशङ्क्याऽऽह—**अत्र चेति**। संसारकारणमविद्यादिदोषस्तन्निवर्तकत्वमपरविद्यायाः कर्मात्मिकाया न सम्भवत्यविरोधात्। न हि शतशोऽपि प्राणायामं कुर्वतः शुक्तिदर्शनं विना तदविद्यानिवृत्ति-र्दृश्यते। ततोऽपरविद्यायाः संसारकारणाविद्यानिवर्तकत्वं नास्तीति स्वयमेवोक्त्वा ब्रह्मविद्यामाहेति सम्बन्धः। किञ्च परमपुरुषार्थसाधनत्वेन ब्रह्मविद्यायाः परविद्यात्वं निकृष्टसंसारफलत्वेन च कर्मविद्याया अपरविद्यात्वम्। ततः [2]समाख्याबलादपरविद्याया मोक्षसाधनत्वाभावोऽवगम्यत इत्यभिप्रेत्याऽऽह—**परापरेति**। **यच्चाऽहुः कर्मजडाः** केवल-ब्रह्मविद्यायाः कर्तृसंस्कारत्वेन कर्माङ्गत्वात्स्वातन्त्र्येण पुरुषार्थसाधनत्वं नास्तीति तदनन्तरश्रुत्यैव निराकृतमित्याह—**तथा परप्राप्तिसाधनमिति**। ब्रह्मविद्यायाः कर्माङ्गत्वे कर्मणो निन्दा न स्यात्। न खल्वङ्गविधानाय प्रधानं विनिन्द्यते अत्र तु सर्वसाध्यसाधननिन्दया तद्विषयवैराग्याभिधानपूर्वकं परप्राप्तिसाधनं ब्रह्मविद्यामाह—अतो ब्रह्मविद्यायाः स्वप्रधानत्वात्तत्प्रकाशकोपनिषदां न कर्तुः स्तावकत्वमित्यर्थः। यद्युपनिषदां स्वतन्त्रब्रह्मविद्याप्रकाशकत्वं स्यात्तर्हि तदध्येतॄणां सर्वेषामेव किमिति ब्रह्मविद्या न स्यादित्याशङ्क्याह—**गुरुप्रसादलभ्यामिति**। गुर्वनुग्रहादिसंस्कारा-भावात्सर्वेषां यद्यपि न भविष्यति तथाऽपि विशिष्टाधिकारिणां भविष्यतीति भावः। ननु स्वतन्त्रा चेद्ब्रह्मविद्या तर्हि प्रयोजनसाधनं न स्यात्। सुखदुःखप्राप्तिपरिहारयोः प्रवृत्तिनिवृत्तिसाध्यतावगमात्तत्राऽऽह—**प्रयोजनं चेति**। स्मरणमात्रेण विस्मृतसुवर्णलाभे सुखप्राप्तिप्रसिद्धेः रज्जुतत्त्वज्ञानमात्राच्च सर्पजन्यभयकम्पादिदुःखनिवृत्तिप्रसिद्धेश्च न प्रवृत्तिनिवृत्तिसाध्यत्वं प्रयोजनस्यैकान्तिकम्। अतो विश्रब्धं श्रुतिः प्रयोजनसम्बन्धं विद्याया असकृद्ब्रवीति। तस्मात्तत्प्रकाशकोपनिषदो व्याख्येयत्वं सम्भवतीत्यर्थः। [3]**यच्चाऽऽहुरेकदेशिनः** स्वाध्यायाध्ययनविधेरर्थावबोधफलस्य त्रैवर्णिकाधिकारत्वादधीतोपनिषज्जन्ये ब्रह्मज्ञानेऽस्त्येव सर्वेषामधिकारः। ततः सर्वाश्रमकर्मसमुच्चितैव ब्रह्मविद्या मोक्षसाधनमिति तत्राऽऽह—**ज्ञानमात्र इति**। सर्वस्वत्यागात्मकसंन्यासनिष्ठैव परब्रह्मविद्या मोक्षसाधनमिति वेदो दर्शयति। तादृशसंन्यासिनां च कर्मसाधनस्य स्वस्याभावान्न कर्मसम्भवः। आश्रमधर्मोऽपि शमदमाद्युपबृंहित-विद्याभ्यासनिष्ठत्वमेव। तेषां शौचाचमनादिरपि तत्त्वतो नाऽऽश्रमधर्मो लोकसंग्रहार्थत्वात्। ज्ञानाभ्यासेनैवापावनत्व-निवृत्तेः। "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" इति स्मरणात्। त्रिषवणस्नानविध्यादेरज्ञसंन्यासिविषयत्वात्। अतः कर्मनिवृत्त्यैव साहित्यं ज्ञानस्य न कर्मणेत्यर्थः। इतश्च न कर्मसमुच्चिता विद्या मोक्षसाधनमित्याह—**विद्या-कर्मविरोधाच्चेति**। अकर्तृ ब्रह्मैवास्मीति करोमि चेति स्फुटो व्याघात इत्यर्थः। यदा ब्रह्मात्मैकत्वं विस्मरति तदोत्पन्नविद्योऽपि करिष्यति ततः समुच्चयः सम्भाव्यत इति न वाच्यमित्याह—**विद्याया इति**। ननु गृहस्थाना-

---

१. प्रवर्तेयुरिति पाठं दृष्ट्वेदमुक्तम्।

२. समाख्या—अपरविद्येति यौगिकः शब्दः, तत्रापरत्वं विद्याया मोक्षापेक्षया न्यूनफलकत्वम्।

३. एकदेशिनो भास्करादयः, अधीतेन स्वाध्यायेन प्रयोजनवदर्थज्ञानं सम्पादयेदिति मीमांसकैरुक्तः। केवल-वेदस्य निष्प्रयोजनत्वात् अनुष्ठानद्वारा स्वर्गादिसाधनमर्थज्ञानमेवोद्दिश्यं तथा च वेदान्तानां वेदत्वात् तदर्थज्ञानं सर्वैः त्रैवर्णिकैः प्रयोजनान्तरमनुद्दिश्यैव सम्पादनीयमित्यर्थः।

ब्रह्मविद्यासम्प्रदायकर्तृत्वादि लिङ्गं न तत्स्थतन्यायं बाधितुमुत्सहते। न हि विधिशतेनापि तमःप्रकाशयोरेकत्र सद्भावः शक्यते कर्तुं किमुत लिङ्गैः केवलैरिति। एवमुक्तसम्बन्धप्रयोजनाया उपनिषदोऽल्पाक्षरं ग्रन्थविवरणमारभ्यते। [1]य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं वा ब्रह्म गमयत्यविद्यादिसंसारकारणं चात्यन्तमवसादयति विनाशयतीत्युपनिषत्। उपनिपूर्वस्य सदेरेवमर्थस्मरणात्।

ब्रह्मा परिबृढो महान्धर्मज्ञानवैराग्यैश्वर्यैः सर्वानन्यानतिशेत इति। देवानां द्योतनवतामिन्द्रादीनां प्रथमो गुणैः ५
प्रधानः सन्प्रथमोऽग्रे वा सम्बभूवाभिव्यक्तः सम्यक्[2]स्वातन्त्र्येणेत्यभिप्रायः। न तथा यथा धर्माधर्मवशात्संसारिणोऽन्ये जायन्ते। "योऽसावतीन्द्रियोऽग्राह्यः" इत्यादिस्मृतेः। विश्वस्य सर्वस्य जगतः कर्तोत्पादयिता। भुवनस्योत्पन्नस्य गोप्ता पालयितेति विशेषणं ब्रह्मणो विद्यास्तुतये। स एवं प्रख्यातमहत्त्वो ब्रह्मा ब्रह्मविद्यां ब्रह्मणः परमात्मनो विद्यां ब्रह्मविद्याम् 'येनाक्षरं पुरुषं वेद सत्यम्' इति विशेषणात्परमात्मविषया हि सा। ब्रह्मणा वाऽग्रजेनोक्तेति ब्रह्मविद्या। तां [3]सर्वविद्याप्रतिष्ठां सर्वविद्याभिव्यक्तिहेतुत्वात्सर्वविद्याश्रयामित्यर्थः। सर्वविद्यावेद्यं वा वस्त्वनयैव विज्ञायत इति। १०

मङ्किरःप्रभृतीनां विद्यासम्प्रदायप्रवर्तकत्वदर्शनाद्गृहस्थाश्रमकर्मभिः समुच्चयो लिङ्गादवगम्यत इत्याशङ्क्याऽऽह—**यस्त्विति**। [4]लिङ्गस्य न्यायोपबृंहितस्यैव गमकत्वाङ्गीकारात्समुच्चये च न्यायाभावात्प्रत्युत विरोधदर्शनान्न लिङ्गेन समुच्चयसिद्धिः। सम्प्रदायप्रवर्तकानां च गार्हस्थ्यस्या[5]ऽऽभासमात्रत्वात्तत्त्वानुसन्धानेन मुहुर्मुहुर्बाधात्।

[6]"यस्य मे चास्ति सर्वत्र यस्य मे नास्ति किञ्चन। मिथिलायां प्रदीप्तायां न मे किञ्चन दह्यते॥"

इत्यृद्गारदर्शनात्कर्माभासेन न समुच्चयः स्यात्तत्र च विधिर्न दृश्यत इति भावः। साधितं व्याख्येयत्वमुप- १५
संहरति—**एवमिति**। ग्रन्थे कथमुपनिषच्छब्दप्रयोग इति शङ्कायामुपनिषच्छब्दवाच्यविद्यार्थत्वाल्लाक्षणिक इति दर्शयितुं विद्याया उपनिषच्छब्दार्थत्वमाह—**य इमामिति। आत्मभावेनेति**। प्रेमास्पदतयेत्यर्थः। अनर्थपूगं क्लेश-समूहं निशातयति शिथिलीकरोत्यपरिपक्वज्ञानाद्द्वित्रैर्जन्मभिर्मोक्षसम्भवादित्यर्थः।

"ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम्॥"
इति स्मरणाद्धर्मज्ञानवैराग्यैश्वर्यैः सर्वानन्यानतिक्रम्य वर्तत इति परिबृढत्वं सिद्धमित्यर्थः। २०

---

१. य इमामिति—'षद्लृ' विशरणगत्यवसादनेषु इत्युक्तेः क्रमेणार्थत्रयमपि ब्रह्मविद्यायां योजयति।

२. स्वातन्त्र्येण—न कर्मवश्यतया, आधिकारिकपुरुषो ब्रह्मा, स च स्वातन्त्र्येण गृहादिव गृहान्तरं शरीराणि गच्छति।

३. अत्र विशिष्टाद्वैतिनः सर्वविद्याप्रतिष्ठां सर्वविद्याश्रयां ज्ञातव्ये ब्रह्मणि कृत्स्नज्ञातव्यान्तर्भावात् ब्रह्मज्ञाने कृत्स्नविषयज्ञानानि अन्तर्भूतानीत्यर्थः इत्यूचुः (श्रुत. प्र) तथापि ब्रह्मशरीरभूतचिदचितोः प्रत्येक- २५
विशेषज्ञानाभावादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्तिः। अस्मन्मते तु ब्रह्मणि ज्ञाते सर्वस्यापि तत्त्वतो ज्ञातत्वात् ज्ञातव्यान्तराभावात् सर्वविद्यापरिसमाप्तिरेव ब्रह्मज्ञाने सति।

माध्वास्तु—सर्वविद्यासाफल्यहेतुः इति व्याचक्रुः। तत् ब्रह्मविद्यां विनापि लौकिकविद्यायाः फल-दर्शनात् चिन्त्यम्।

४. केवलं लिङ्गमर्थवादगतत्वसंशयाक्रान्तं न श्रुतिकल्पकमतो न्यायोऽप्यपेक्षितः, विरोधदर्शनात् न समुच्चय- ३०
प्राप्तिः, अत एवात्र न्यायाभावः।

५. आभासमात्रत्वात् तेषां जनकादीनां गार्हस्थ्यं आभास एव प्रतिभासमात्रं न तु वास्तविकम्। तत्र गमकमाह—"यस्य मे नास्ती"ति। श्रीजनकमहाराजस्येदं वचनं विषयेषु मम सङ्गो नास्ति, असङ्गोऽहमित्यर्थः।

६. "अनन्तं बत मे वित्तं यस्य मे नास्ति किञ्चन। मिथिलायां प्रदीप्तायां न मे किञ्चन दह्यते॥" इति ३५
श्रीभीष्मेणानूदितम्—अत्र नीलकण्ठी टीका—अनन्तं देशकालवस्तुपरिच्छेदरहितं वित्तमिव गूढं कोश-पञ्चकलक्षणगुहास्थं प्रत्यक्तत्वमेव मे स्वरूपम्। अत एव सर्वस्य मदनन्यत्वात् रज्जुसर्पवत् मया कल्पि-तत्वाच्च मे मम न किञ्चन। तदाह—मिथिलायामिति। न हि अध्यस्तदोषैः अधिष्ठानं स्पृश्यते।
(महाभारते शान्तिपर्वणि १७७ सर्गे)

अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम् ।
स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥ २ ॥
शौनको ह वै महाशालोऽङ्गिरसं [1]विधिवदुपसन्नः पप्रच्छ ।
[2]कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ ३ ॥

"येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातम्" इति श्रुतेः । सर्वविद्याप्रतिष्ठामिति च स्तौति । विद्यामथर्वाण ज्येष्ठपुत्राय प्राह । ज्येष्ठश्चासौ पुत्रश्चानेकेषु ब्रह्मणः सृष्टिप्रकारेष्वन्यतमस्य सृष्टिप्रकारस्य प्रमुखे पूर्वमथर्वा सृष्ट इति ज्येष्ठस्तस्मै ज्येष्ठपुत्राय प्राहोक्तवान् ॥ १ ॥

यामेतामथर्वणे प्रवदेतावदब्रह्मविद्यां ब्रह्मा तामेव ब्रह्मणः प्राप्तामथर्वा पुरा पूर्वमुवाचोक्तवानङ्गिरेऽङ्गिर्नाम्ने ब्रह्मविद्याम् । स चाङ्गिर्भारद्वाजाय भरद्वाजगोत्राय सत्यवहाय सत्यवहनाम्ने प्राह प्रोक्तवान् । भारद्वाजोऽङ्गिरसे स्वशिष्याय पुत्राय वा परावरां परस्मात्परस्मादवरेण प्राप्नेति परावरा परावरसर्वविद्याविषयव्याप्नेर्वा तां परावरामङ्गिरसे प्राहेत्यनुषङ्गः ॥ २ ॥

शौनकः शुनकस्यापत्यं महाशालो महागृहस्थोऽङ्गिरसं भारद्वाजशिष्यमाचार्यं विधिवद्यथाशास्त्रमित्येतत् । उपसन्नः उपगतः सन्पप्रच्छ पृष्टवान् । शौनकाङ्गिरसोः सम्बन्धादर्वाग्विधिवद्विशेषणादुपसदनविधेः पूर्वेषामनियम इति गम्यते। मर्यादाकरणार्थं मध्यदीपिकान्यायार्थं वा विशेषणम् । [3]अस्मदादिष्वप्युपसदनविधेरिष्टत्वात् । किमित्याह—कस्मिन्नु भगवो विज्ञाते[4] नु इति वितर्के। भगवो हे भगवन्सर्वं यदिदं विज्ञेयं विज्ञातं विशेषेण ज्ञातमवगतं भवतीति। एकस्मिन्

"योऽसावतीन्द्रियोऽग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः । सर्वभूतमयोऽचिन्त्यः स एष स्वयमुद्बभौ ।" (मनु० १.७)

'स्वयमुद्भूतः-शुक्रशोणितसंयोगमन्तरेणाऽऽविर्भूतः—इति **स्मृतेः** स्वातन्त्र्यं गम्यत इत्यर्थः । वाक्योत्थबुद्धिवृत्यभिव्यक्तं ब्रह्मैव ब्रह्मविद्या । तच्च ब्रह्म सर्वाभिव्यञ्जकम् । ततः सर्वविद्यानां व्यञ्जकतयाऽऽश्रीयत इति सर्वविद्याश्रया, अथवा सर्वविद्यानां प्रतिष्ठा परिमाप्तिर्भवति यस्यामुत्पन्नायां ज्ञातव्याभावात्सा सर्वविद्याप्रतिष्ठेत्याह—**सर्वविद्यावेद्यं वेति ॥ १-२ ॥**

प्रश्नबीजमाह—**एकस्मिन्निति ।** उपादानात्कार्यस्य पृथक्सत्त्वाभावादुपादाने ज्ञाते तत्कार्यं ततः पृथङ्-

---

१. "समित्पाणिः" इत्युक्तरीत्या "अधीहि भगव" इति मन्त्रेण च ।

२. एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा छान्दोग्यषष्ठे सम्यगुपपादिता शिष्यप्रश्नोत्तरत्वेन । तत्र हि "येनाश्रुतं श्रुतं भवति" इत्यादिना पित्रा उद्दालकेन एकविज्ञानेन सर्वविज्ञानमुपक्षिप्तम् । शिष्यः श्वेतकेतुः "कथं नु भगवः स आदेशो भवती"ति पप्रच्छ । तदुत्तरत्वेन "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादि"त्यादिना उपादानज्ञानेनोपादेयं सर्वं विज्ञातं भवति । उपादेयं मिथ्या उपादानमेव तु सत्यं तदेव चोपादेयस्य तत्त्वं, ततश्चोपादानज्ञानेनोपादेयं सर्वं तत्त्वतो विज्ञातं भवतीत्युक्तम् ।

अत्रापि "पुरुष एवेदं विश्वम्" इति पुरुषव्यतिरेकेण वस्त्वन्तराभावात् ब्रह्मज्ञानेन सर्वज्ञानमुपपादितम् । मतान्तरे तु घटशरावादयः मृदः अवस्थाविशेषाः पृथक्सत्ताप्रतिपत्तिरहिताः । अतः मृत्सत्तया सत्तावन्तः मृदः ज्ञानेन ज्ञाता भवन्ति । एवमेव जगद्ब्रह्मणोः । न चैवमद्वैतप्रवेशः गुणादिषु द्वित्वादिप्रतीतेर्द्रव्यगतद्वित्वादिविषयत्वेऽपि न रूपादिषु संख्याप्रतीतेर्भ्रमत्वम् । एवं विकारगतसत्ताया न भ्रमसिद्धत्वमित्याहुः । तत्रेदं वक्तव्यं—रूपादिषु संख्याप्रतीतेः साक्षात्सम्बन्धविषयत्वे भ्रमत्वमेव न्यायमते । स्वाश्रयवृत्तित्वरूपपरम्परासम्बन्धविषयत्वे प्रपञ्चे ब्रह्मसत्ता परम्परया भातीत्यागतम् । स्वतस्सत्ता नास्तीति च । अद्वैतिनोऽपि प्रपञ्चे सत्ता नास्ति ब्रह्मसत्तैव तत्र भातीति वदन्ति । सम्बन्धस्तु भिन्नः सत्ता प्रपञ्चे नास्तीति समानम् । मध्वमतेऽप्येवमेव ।

३. मर्यादायामस्वरसादाह ।

४. सर्वविद्यावेद्यवस्त्वधिष्ठानत्वाच्च (कल्प०) ।

तस्मै स होवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च ॥ ४ ॥
[1]तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं
निरुक्तं छन्दो ज्योतिषमिति[2] । अथ परा यया तदक्षरमधिगम्यते ॥ ५ ॥

ज्ञाते सर्वविद्भवतीति शिष्टप्रवादं श्रुतवाञ्शौनकस्तद्विशेषं विज्ञातुकामः सन्कस्मिन्निति वितर्कयन्पप्रच्छ । अथवा लोकसामान्यदृष्टचा ज्ञात्वैव पप्रच्छ । सन्ति लोके सुवर्णादिशकलभेदाः सुवर्णत्वाद्येकत्वविज्ञानेन विज्ञायमाना लौकिकैः । ५
तथा किन्वस्ति सर्वस्य जगद्भेदस्यैकं कारणम् । यदेकस्मिन्विज्ञाते सर्वं विज्ञातं भवतीति । नन्वविदिते हि कस्मिन्निति प्रश्नोऽनुपपन्नः । किमस्ति तदिति तदा प्रश्नो युक्तः । सिद्धे ह्यस्तित्वे कस्मिन्निति स्यात् । यथा कस्मिन्निधेयमिति । न । अक्षरबाहुल्यादायासभीरुत्वात्प्रश्नः सम्भवत्येव किन्त्वस्ति तत् यस्मिन्नेकस्मिन्विज्ञाते सर्ववित्स्यादिति ॥ ३ ॥

तस्मै शौनकायाङ्गिरा ह किलोवाच । किमित्युच्यते । द्वे विद्ये वेदितव्ये इति । एवं ह स्म किल यद्ब्रह्मविदो वेदार्थाभिज्ञाः परमार्थदर्शिनो वदन्ति । के ते इत्याह । परा च परमात्मविद्या । अपरा च धर्माधर्मसाधन- १०
तत्फलविषया । ननु कस्मिन्विदिते सर्वविद्भवतीति शौनकेन पृष्टं तस्मिन्वक्तव्येऽपृष्टमाहाङ्गिरा द्वे विद्ये इत्यादि । नैष दोषः। क्रमापेक्षत्वात्प्रतिवचनस्य । अपरा हि विद्याऽविद्या सा निराकर्तव्या। तद्विषये हि विदिते न किञ्चित्तत्त्वतो विदितं स्यादिति । निराकृत्य हि पूर्वपक्षं पश्चात्सिद्धान्तो वक्तव्यो भवतीति न्यायात् ॥ ४ ॥

तत्र काऽपरेत्युच्यते । ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इत्येते चत्वारो वेदाः शिक्षा [3]कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गानि षडेषाऽपरा विद्या । अथेदानीमियं परा विद्योच्यते यया तद्वक्ष्यमाणविशेषण- १५
मक्षरमधिगम्यते प्राप्यते । अधिपूर्वस्य गमेः प्रायशः प्राप्त्यर्थत्वात् । न च परप्राप्तेरवगमार्थस्य भेदोऽस्ति । अविद्याया अपाय एव हि परप्राप्तिर्नार्थान्तरम् । ननु ऋग्वेदादिबाह्या तर्हि सा कथं परा विद्या स्यान्मोक्षसाधनं च । "या वेदबाह्याः स्मृतय" इति हि स्मरन्ति । कुदृष्टित्वान्निष्फलत्वादनादेया स्यात् । उपनिषदां च ऋग्वेदादिबाह्यत्वं स्यात् ।

नास्तीति ज्ञातं भवतीति सामान्यव्याप्तिस्तद्बलाद्वा पप्रच्छेत्याह—**अथवेति** । प्रश्नाक्षराञ्जस्यमाक्षिप्य समाधत्ते—**नन्वविदिते हीत्यादिना** । किमस्ति तदिति प्रयोगेऽक्षरबाहुल्येनाऽऽयासः स्यात्तद्भीरुतया कस्मिन्नित्यक्षराङ्गस्ये २०
लाघवात्प्रश्न इत्यर्थः ॥ ३-४ ॥

कल्पः सूत्रग्रन्थः । अनुष्ठेयक्रमः कल्प इत्यर्थः । अविद्याया अपगम एव परप्राप्तिरुपचर्यते । अविद्यापगमश्च ब्रह्मावगतिरेवेति व्याख्यातमस्माभिर्ज्ञातोऽर्थस्तज्ज्ञप्तिर्वा[4]ऽविद्यानिवृत्तिरित्येतद्व्याख्यानावसरे । अतोऽधिगमशब्दोऽत्र प्राप्तिपर्याय एवेत्याह—**न च परप्राप्तेरिति** । साङ्गानां वेदानामपरविद्यात्वेनोपन्यासात्ततः पृथक्करणाद्वेदबाह्यतया ब्रह्मविद्यायाः परत्वं न सम्भवतीत्याक्षिपति—**नन्विति** । २५

---

१. यद्यपि ऋग्वेदादिशब्दरूपेत्युक्तं भाष्ये तथापि तद्गतकर्मकाण्डप्रतिपाद्यकर्मविद्याप्यत्र ग्राह्या । अत एव तदेतत्सत्यमित्यादिना कर्माण्युच्यन्ते अपरविद्याप्रतिपाद्यानि । तदन्ते च 'प्रोवाच तां तत्त्वतो ब्रह्मविद्यां' इत्युक्त्या उपरिष्टाद्ब्रह्मविद्या आरभ्यत इति सूचितं भवति । शब्दमात्रं चेत् इह तदप्रतिपादनदोषः स्यात् । ऋगादिपदं अजहल्लक्षणया ऋगादिवेदगतमन्त्रप्रतिपाद्यविषयविद्यापरमिति ज्ञेयम् । रामानुजीयास्तु 'परोक्षब्रह्मज्ञानं अपराविद्ये'त्याहुः । तत्र कर्मकाण्डेन परोक्षब्रह्मज्ञानं जायत इति च । तद्दुरुप- ३०
पादम् । अस्मन्मते सर्ववेदप्रतिपाद्यत्वं न तद्रीत्या अपितु वेद्यः प्राप्यः इत्यर्थात् कर्मकाण्डेन निष्कामकर्मचित्तशुद्धिज्ञानोत्पत्त्यादिना प्राप्य इत्यर्थान्नास्माकं दोषः ।

माध्वास्तु—पराधिगतिहेतुत्वोपाधिना ऋग्वेदादिविद्या परा अमुख्यार्थबोधकत्वोपाधिना अपरेति व्याचक्षते । तत्र कर्मकाण्डस्य ब्रह्मपरत्वं विद्वद्रूढिशक्त्येति च, तन्मतं नान्ये स्वीकुर्वन्ति ।

२. शिक्षादीनां प्रवाहनित्यत्वात् अनादिवेदप्रतिपाद्यत्वोपपत्तिः । ३५

३. कल्पः—सिद्धरूपप्रयोगप्रतिपादकग्रन्थः ।

४. अविद्यानिवृत्तिः विद्यैव घटप्रागभावनिवृत्तेः घटरूपत्ववत् ।

[1]यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् ।
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं[2] परिपश्यन्ति धीराः ॥ ६ ॥

ऋग्वेदादित्वे तु पृथक्करणमनर्थकम् । अथ कथं परेति । न । वेद्यविषयविज्ञानस्य विवक्षितत्वात् । उपनिषद्वेद्याक्षरविषयं हि विज्ञानमिह परा विद्येति प्राधान्येन विवक्षितं नोपनिषच्छब्दराशिः । वेदशब्देन तु सर्वत्र शब्दराशिविवक्षितः । शब्दराश्यधिगमेऽपि यत्नान्तरमन्तरेण गुर्वभिगमनादिलक्षणं वैराग्यं च नाक्षराधिगमः सम्भवतीति पृथक्करणं ब्रह्मविद्यायाः परा विद्येति कथनं चेति ॥ ५ ॥

यथा विधिविषये कर्त्राद्यनेककारकोपसंहारद्वारेण [3]वाक्यार्थज्ञानकालादन्यत्रानुष्ठेयोऽर्थोस्त्यग्निहोत्रादिलक्षणो न तथेह परविद्याविषये । [4]वाक्यार्थज्ञानसमकाल एव तु पर्यवसितो भवति । केवलशब्दप्रकाशितार्थज्ञानमात्रनिष्ठाव्यतिरिक्ताभावात् । तस्मादिह परां विद्यां सविशेषणेनाक्षरेण विशिनष्टि—यत्तदद्रेश्यमित्यादिना । वक्ष्यमाणं बुद्धौ संहृत्य सिद्धवत्परामृश्यते—यत्तदिति । अद्रेश्यमदृश्यं सर्वेषां बुद्धीन्द्रियाणामगम्यमित्येतत् । [5]दृशेर्बहिष्प्रवृत्तस्य पञ्चेन्द्रियद्वारकत्वात् । अग्राह्यं कर्मेन्द्रियाविषयमित्येतत् । अगोत्रं गोत्रमन्वयो मूलमित्यनर्थान्तरम् । अगोत्रमनन्वयमित्यर्थः । न हि तस्य मूलमस्ति येनान्वितं स्यात् । वर्ण्यन्त इति वर्णा द्रव्यधर्माः स्थूलत्वादयः शुक्लत्वादयो वा । अविद्यमाना वर्णा यस्य तदवर्णमक्षरम् । अचक्षुःश्रोत्रं चक्षुश्च श्रोत्रं च नामरूपविषये करणे सर्वजन्तूनां, ते अविद्यमाने यस्य

"या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥"

इति स्मृतेः कुदृष्टित्वादनुपादेया स्यादित्यर्थः । विद्याया वेदबाह्यत्वे तदर्थानामुपनिषदामप्यृग्वेदादिबाह्यत्वं प्रसज्येतेत्यर्थः । वेदबाह्यत्वेन पृथक्करणं न भवति । किन्तु वैदिकस्यापि ज्ञानस्य वस्तुविषयस्य शब्दराश्यतिरेकाभिप्रायेणेत्याह—न वेद्यविषयेति ॥ ५ ॥

कर्मज्ञानाद्विलक्षणत्वाभिप्रायेण च पृथक्करणमित्याह—यथा विधिविषय इति । अप्राप्तप्रतिषेधप्रसङ्गान्न

---

१. यत्तदद्रेश्यं इत्यत्रोक्तं भूतयोन्यक्षरं प्रधानं शारीरः ब्रह्म वेति संशय्य "अदृश्यत्वादिगुणको धर्मोक्तेः" इत्यधिकरणे ब्रह्मैवेति निर्णीतम् । "यस्सर्वज्ञः सर्ववित्" इत्यादेः प्रधाने जीवे चासम्भवात् । "तथाक्षरात्सम्भवतीह विश्वं" इति जायमानप्रकृतित्वेन निर्दिष्टाक्षरस्य तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते इति सर्वज्ञब्रह्मणः उत्पत्तिश्रुतेः एकविज्ञानेन सर्वविज्ञानस्य प्रधाने जीवे चासम्भवाच्च । अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं इति (३-३-३३) अधिकरणे अत्र वाक्ये श्रूयमाणा अक्षरब्राह्मणोक्ता अस्थूलत्वादयश्च सर्वत्रोपसंहर्तव्याः ज्ञेयस्य ब्रह्मणः एकत्वात् प्रतिपादनप्रकारस्य चैकत्वादित्युक्तम् ।

२. अत्र योनिपदमुपादानपरम् । अस्मन्मते ब्रह्मणो विवर्तोपादानतया प्रपञ्चस्य योनिः मृद्भावापन्नं ब्रह्मैव घटोपादानमिति मृदः घटोपादानत्वे न कापि हानिः । रामानुजीयानां ब्रह्मशरीररूपप्रकृतेरुपादानत्वात् ब्रह्मणः उपादानत्वोक्तिः । मध्वमते—ब्रह्म निमित्तमेव नोपादानम् । उभयत्रापि योनिशब्दो न सङ्गच्छते ।

३. कर्मकाण्डादर्थज्ञानं प्रयोगज्ञानं च सम्पाद्य ततः भार्यादिकं धनादिकं च सम्पाद्य कर्मानुष्ठेयम् । ज्ञानकाण्डे तु शुद्धचित्तस्याधिकारिणः वाक्यादेव साक्षात्कारो जायते, तत एवाविद्यानिवृत्त्युपलक्षितानन्दरूपो मोक्ष इति भेदः । यद्यपि "योऽश्वमेधेन यजते य उ चैनमेवं वेद" इति श्रुतेः ज्ञानादपि फलप्राप्तिर्गम्यते तथापि सा मानसादिब्रह्महत्यापापनिवृत्तिरूपैवेति माधवाचार्या वेदभाष्ये । मानसपूजादीनामपि फलवत्वमिष्यत एव तद्वन्मानसप्रयोगज्ञानस्यापि फलवत्वमस्ति । वस्तुतस्तु "जाग्रत्प्रत्यया अपि मानसप्रत्ययाभिनिर्वृत्ता एव सदीक्षाभिनिर्वृत्ततेजोबन्नमयत्वात् जाग्रद्विषयाणाम्" इति भगवत्पादैः दहरविद्यायामभिधानात् मानसानामपि फलजनकत्वमस्त्येव । लोकव्यवहारानुरोधेन तु अत्रानुष्ठानापेक्षत्वोक्तिः ।

४. वाक्यार्थज्ञानम्—तत्त्वमसीत्यादि महावाक्यार्थज्ञानम् । अनेन च शाब्दः ब्रह्मसाक्षात्कार उक्तः, तदुपरि प्रसंख्यानादिकं नास्तीति च सूचितम् ।

५. दृशेः—अन्तःकरणवृत्तेः । इन्द्रियद्वारा बहिःप्रवृत्ता अन्तःकरणवृत्तिः विषयं व्याप्नोतीति प्रक्रिया ।

[1]यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम् ॥ ७ ॥
तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥ ८ ॥

तदचक्षुःश्रोत्रम् । यः सर्वज्ञः सर्वविदित्यादिचेतनावत्त्वविशेषणत्वात्प्राप्तं संसारिणामिव चक्षुःश्रोत्रादिभिः करणैरर्थसाधकत्वं तदिहाचक्षुःश्रोत्रमिति वार्यते । "पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्यादिदर्शनात् । किञ्च तदपाणिपादं कर्मेन्द्रियरहितमित्येतत् । यत एवमग्राह्यमग्राहकं चातो नित्यमविनाशि । विभुं विविधं ब्रह्मादिस्थावरान्तप्राणिभेदैर्भवतीति विभुम् । सर्वगतं व्यापकमाकाशवत्, सुसूक्ष्मं शब्दादिस्थूलत्वकारणरहितत्वात् । शब्दादयो ह्याकाशवाय्वादीनामुत्तरोत्तरं स्थूलत्वकारणानि तदभावात्सुसूक्ष्मम् । किञ्च तदव्ययमुक्तधर्मत्वादेव न व्येतीत्यव्ययम् । न ह्यनङ्गस्य स्वाङ्गापचयलक्षणो व्ययः सम्भवति शरीरस्येव, नापि कोशापचयलक्षणो व्ययः सम्भवति राज्ञ इव । नापि गुणद्वारको व्ययः सम्भवत्यगुणत्वात्[2] सर्वात्मकत्वाच्च । यदेवंलक्षणं भूतयोनिं भूतानां कारणं पृथिवीव स्थावरजङ्गमानां परिपश्यन्ति सर्वत आत्मभूतं सर्वस्याक्षरं पश्यन्ति धीरा धीमन्तो विवेकिनः । ईदृशमक्षरं यया विद्ययाऽधिगम्यते सा परा विद्येति समुदायार्थः ॥ ६ ॥

भूतयोन्यक्षरमित्युक्तं तत्कथं भूतयोनीत्युच्यते प्रसिद्धदृष्टान्तैः । यथा लोके प्रसिद्धम् । ऊर्णनाभिर्लूताकीटः किञ्चित्कारणान्तरमनपेक्ष्य स्वयमेव सृजते स्वशरीराव्यतिरिक्तानेव तन्तून्बहिः प्रसारयति पुनस्तानेव गृह्णते च गृह्णाति स्वात्मभावमेवाऽऽपादयति । यथा च पृथिव्यामोषधयो व्रीह्यादिस्थावरान्ता इत्यर्थः । स्वात्माव्यतिरिक्ता एव प्रभवन्ति । यथा च सतो विद्यमानाज्जीवतः पुरुषात्केशलोमानि केशाश्च लोमानि च सम्भवन्ति विलक्षणानि । यथैते दृष्टान्तास्तथा विलक्षणं सलक्षणं च निमित्तान्तरानपेक्षाद्यथोक्तलक्षणादक्षरात्सम्भवति समुत्पद्यत इह संसारमण्डले विश्वं समस्तं जगत् । अनेकदृष्टान्तोपादानं तु सुखार्थप्रबोधनार्थम् ॥ ७ ॥

यद्ब्रह्मण उत्पद्यमानं विश्वं तदनेन क्रमेणोत्पद्यते न युगपद्बदरमुष्टिप्रक्षेपवदिति क्रमनियमविवक्षार्थोऽयं मन्त्र आरभ्यते । तपसा ज्ञानेनोत्पत्तिविधिज्ञतया भूतयोन्यक्षरं ब्रह्म चीयत उपचीयत उत्पिपादयिषदिदं जगदङ्कुरमिव बीजमुच्छूनतां गच्छति पुत्रमिव पिता हर्षेण । एवं सर्वज्ञतया सृष्टिस्थितिसंहारशक्तिविज्ञानवत्तयोपचितात्ततो

प्रधानपरत्वमपि शङ्क्यमिति मत्वाऽऽह—**यः सर्वज्ञ इति** । **अगुणत्वादिति** । उपसर्जनरहितत्वादित्यर्थः । **सर्वात्मकत्वाच्चेति** । हेयस्यातिरिक्तस्याभावाच्चेत्यर्थः ॥ ६ ॥

ब्रह्म न कारणं सहायशून्यत्वात्कुलालमात्रवदित्यस्यानैकान्तिकत्वमुक्तमूर्णनाभिदृष्टान्तेन । ब्रह्म जगतो नोपादानं तदभिन्नत्वात्स्वरूपस्येवेत्यनुमानान्तरस्यानैकान्तिकत्वमाह—**यथा च पृथिव्यामिति** । जगन्न ब्रह्मोपादानकं तद्विलक्षणत्वात् । यत् यद्विलक्षणं तत्तदुपादानकं न भवति । यथा घटो न तन्तूपादनक इति । अस्य व्यभिचारार्थमाह—**यथा च सत इति** । एकस्मिन्नपि दृष्टान्ते सर्वानुमानानामनैकान्तिकत्वं योजयितुं शक्यमिति शङ्कमानं प्रत्याह—**अनेकदृष्टान्तेति** ॥ ७ ॥

ईश्वरत्वोपाधिभूतं मायातत्त्वं महाभूतादिरूपेण सर्वजीवैरुपलभ्यत इति सर्वसाधारण्येऽपि कथं जायतेऽनादि-

---

१. अत्र न विलक्षणत्वादस्य तथात्वं च शब्दात् इति सूत्रेण (२।१।७) जगत् न ब्रह्मोपादानकं तद्विलक्षणत्वात् । यद्यद्विलक्षणं तत् न तदुपादानकं, यथा पटो न मृदुपादानः, इति सामान्यमुखव्याप्त्युपष्टब्धेनानुमानेन ब्रह्मणो जगदुपादानत्वाक्षेपे प्राप्ते दृश्यते तु (२।१।९) इति सूत्रेण समाधानमुक्तं, दृश्यते हि विलक्षणयोरप्युपादानोपादेयभावः । यथोर्णनाभिः चेतनः तच्छरीरात् तन्तवः इति एतन्मन्त्रोदाहरणेन व्यभिचारदूषणमुक्तम् ।

२. अगुणत्वात्—अत्र शुक्लादिगुणो न ग्राह्यः अद्रेश्यमित्यनेन रूपाद्यभावसूचनात् । अपि तु गुणः = परतन्त्रः ।

यः सर्वज्ञः सर्ववित्स्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ ९ ॥

इत्यथर्ववेदीयमुण्डकोपनिषदि प्रथममुण्डके प्रथमः खण्डः

ब्रह्मणोऽन्नमद्यते भुज्यत इत्यन्नमव्याकृतं साधारणं संसारिणां व्याचिकीर्षितावस्थारूपेणाभिजायत उत्पद्यते । ततश्चाव्याकृताद्याचिकीर्षितावस्थातोऽन्नात्प्राणो हिरण्यगर्भो ब्रह्मणो ज्ञानक्रियाशक्त्यधिष्ठितजगत्साधारणोऽविद्याकामकर्मभूतसमुदायबीजाङ्कुरो जगदात्माऽभिजायत इत्यनुषङ्गः । तस्माच्च प्राणान्मनो [1]मनआख्यं सङ्कल्पविकल्पसंशयनिर्णयाद्यात्मकमभिजायते । ततोऽपि सङ्कल्पाद्यात्मकान्मनसः सत्यं सत्याख्यमाकाशादिभूतपञ्चकमभिजायते । तस्मात्सत्याख्याद्भूतपञ्चकादण्डक्रमेण सप्त लोका भूरादयः । तेषु मनुष्यादिप्राणिवर्णाश्रमक्रमेण कर्माणि । कर्मसु च निमित्तभूतेष्वमृतं कर्मजं फलम् । यावत्कर्माणि कल्पकोटिशतैरपि न विनश्यन्ति तावत्फलं न विनश्यतीत्यमृतम् ॥ ८ ॥

उक्तमेवार्थमुपसञ्जिहीर्षुर्मन्त्रो वक्ष्यमाणार्थमाह—य उक्तलक्षणोऽक्षराख्यः सर्वज्ञः सामान्येन सर्वं जानातीति सर्वज्ञः । विशेषेण सर्वं वेत्तीति सर्ववित् । यस्य ज्ञानमयं ज्ञानविकारमेव सार्वज्ञ्यलक्षणं तपो नाऽऽयासलक्षणं तस्माद्यथोक्तात्सर्वज्ञादेतदुक्तं कार्यलक्षणं ब्रह्म हिरण्यगर्भाख्यं जायते । किञ्च नामासौ देवदत्तो यज्ञदत्त इत्यादिलक्षणम् । रूपमिदं शुक्लं नीलमित्यादि । अन्नं च व्रीहियवादिलक्षणं जायते । पूर्वमन्त्रोक्तक्रमेणेत्यविरोधो द्रष्टव्यः ॥ ९ ॥

इति मुण्डकोपनिषद्भाष्ये प्रथममुण्डके प्रथमः खण्डः

सिद्धत्वादित्याशङ्क्याह—**व्याचिकीर्षितेति** । कर्मापूर्वसमवायिभूतसूक्ष्ममव्याकृतमिति केचित् । [2]तन्न, तस्य प्रतिजीवं भिन्नत्वादीश्वरत्वोपाधित्वासम्भवात् । सामान्यरूपेण सम्भवेऽपि पृथिव्यादिसामान्यानां बहुत्वात् । प्रकृतावेकत्वश्रुतिव्याकोपापाताज्जाड्यमहामायारूपेणैकत्वसम्भवेऽपि न कर्मापूर्वसमवायित्वम् । तस्याकारकत्वाद्बुद्ध्यादीनामेव कारकत्वाभिधानात् । कारकावयवेष्वेव क्रियासमवायाभ्युपगमात् । [3]किञ्च न कार्यस्य स्वकारणप्रकृतित्वं दृष्टमिति भूतसूक्ष्मस्यापञ्चीकृतभूतप्रकृतित्वं न स्यात् । तस्मान्महाभूतसर्गादिसंस्कारास्पदं गुणत्रयसाम्यं मायातत्त्वमव्याकृतादिशब्दवाच्यमिहाभ्युपगन्तव्यम् । पूर्वस्मिन्कल्पे हिरण्यगर्भप्राप्तिनिमित्तं प्रकृष्टं ज्ञानं कर्म च येनानुष्ठितं तदनुग्रहाय मायोपाधिकं ब्रह्म हिरण्यगर्भावस्थाकारेण विवर्तते । स च जीवः तदवस्थाभिमानी हिरण्यगर्भ उच्यत इत्यभिप्रेत्याऽऽह—**ब्रह्मण इति** । ज्ञानशक्तिभिः क्रियाशक्तिभिश्चाधिष्ठितं विशिष्टं जगद्व्यष्टिरूपं तस्य साधारणः समष्टिरूपः सूत्रसंज्ञक इत्यर्थः । **मनआख्यमिति** । समष्टिरूपं विवक्षितम् । व्यष्टिरूपस्य लोकसृष्ट्युत्तरकालत्वात् ॥ ८ ॥

वक्ष्यमाणार्थमिति । वक्ष्यमाणस्याविद्याविवरणप्रकरणस्याऽऽरम्भार्थमुक्तपरविद्यासूत्रार्थोपसंहार इत्यर्थः । **सामान्येनेति** । समष्टिरूपेण मायाख्येनोपाधिनेत्यर्थः । **विशेषेणेति** । व्यष्टिरूपेणाविद्याख्येनोपाधिनाऽनन्तजीवभावमापन्नः स एव सर्वं स्वोपाधितत्संसृष्टं च वेत्तीत्यधिदैवमध्यात्मं च तत्त्वाभेदः सूत्रितः । स्रष्टृत्वं प्रजापतीनां तपसा प्रसिद्धम् । तद्वद्ब्रह्मणोऽपि स्रष्टृत्वे तपोऽनुष्ठानं वक्तव्यम् । ततः संसारित्वं प्रसज्येतेत्याशङ्क्याऽऽह—**यस्य ज्ञानमयमिति** । सत्त्वप्रधानमायाया ज्ञानाख्यो विकारस्तदुपाधिकं ज्ञानविकारं सृज्यमानसर्वपदार्थाभिज्ञत्वलक्षणं तपो न तु क्लेशरूपं प्रजापतीनामिवेत्यर्थः ॥ ९ ॥

इति मुण्डकोपनिषद्भाष्यटीकायां प्रथममुण्डके प्रथमः खण्डः

---

१. मनः—ज्ञानशक्तिप्राधानो हिरण्यगर्भ एव । तस्य प्राणाज्जन्म तदवस्थाविशेषरूपत्वमेव ।

२. यद्यपि तस्य लिङ्गशरीरान्तर्गतत्वेन जीवोपाधित्वात् तत्रापूर्वं समवैति तथाऽपि तस्य प्रतिजीवं भिन्नत्वात् नेश्वरोपाधित्वम् । सामान्यरूपेण—पृथिवीत्वादिरूपेण तस्याकारकत्वात्—सामान्यपृथिवीत्वाद्याश्रयस्य कर्मसु अकारणत्वात् सूक्ष्मभूतजन्यबुद्ध्यादीनामेव कारणत्वात् तेष्वेवापूर्वसम्बन्धः इत्यर्थः ।

३. भूतसूक्ष्माः अपञ्चीकृतभूतकार्याः तेषां तत्कारणत्वाभावात् न तेष्वपूर्वसमवायः ।

[1]तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि ।
तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके ॥ १ ॥
यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने । तदाऽऽज्यभागावन्तरेणाऽऽहुतीः प्रतिपादयेत् ॥ २ ॥

साङ्गा वेदा अपरा विद्योक्ता—ऋग्वेदो यजुर्वेद इत्यादिना । यत्तदद्रेश्यमित्यादिना नामरूपमन्नं च जायत इत्यन्तेन ग्रन्थेनोक्तलक्षणमक्षरं यया विद्ययाऽधिगम्यत इति परा विद्या [2]सविशेषणोक्ता। अतः परमनयोर्विद्ययोर्विषयौ विवेक्तव्यौ संसारमोक्षावित्युत्तरो ग्रन्थ आरभ्यते। तत्रापरविद्याविषयः कर्त्रादिसाधनक्रियाफलभेदरूपः संसारोऽनादिरनन्तो दुःखस्वरूपत्वाद्धातव्यः प्रत्येकं शरीरिभिः सामस्त्येन नदीस्रोतोवदव्यवच्छेदरूपसम्बन्धस्तदुपशमलक्षणो मोक्षः परविद्याविषयोऽनाद्यनन्तोऽजरोऽमरोऽमृतोऽभयः शुद्धः प्रसन्नः स्वात्मप्रतिष्ठालक्षणः परमानन्दोऽद्वय इति । पूर्वं तावदपरविद्याया विषयप्रदर्शनार्थमारम्भः । तद्दर्शने हि तन्निर्वेदोपपत्तेः । तथाच वक्ष्यति—"परीक्ष्य लोकान्कर्मचितान्" इत्यादिना। न ह्यप्रदर्शिते परीक्षोपपद्यत इति तत्प्रदर्शयन्नाह—तदेतत्सत्यमवितथम्। किं [3]तन्मन्त्रेष्वृग्वेदाद्याख्येषु कर्माण्यग्निहोत्रादीनि मन्त्रैरेव प्रकाशितानि कवयो मेधाविनो वसिष्ठादयो यान्यपश्यन्दृष्टवन्तः । यत्तदेतत्सत्यमेकान्तपुरुषार्थसाधनत्वात्तानि च वेदविहितान्यृषिदृष्टानि कर्माणि त्रेतायां त्रयीसंयोगलक्षणायां हौत्राध्वर्यवौद्गात्रप्रकारायामधिकरणभूतायां बहुधा बहुप्रकारं सन्ततानि प्रवृत्तानि कर्मिभिः क्रियमाणानि । त्रेतायां वा युगे प्रायशः प्रवृत्तानि । अतो यूयं तान्याचरथ निर्वर्तयत नियतं नित्यं सत्यकामा यथाभूतकर्मफलकामाः सन्तः । एष वो युष्माकं पन्था मार्गः सुकृतस्य स्वयं निर्वर्तितस्य कर्मणो लोके फलनिमित्तं लोक्यते दृश्यते भुज्यत इति कर्मफलं लोक उच्यते । तदर्थं तत्प्राप्तय एष मार्ग इत्यर्थः । यान्येतान्यग्निहोत्रादीनि त्रय्यां विहितानि कर्माणि तान्येष पन्था अवश्यफलप्राप्तिसाधनमित्यर्थः ॥ १ ॥

तत्राग्निहोत्रमेव तावत्प्रथमं प्रदर्शनार्थमुच्यते सर्वकर्मणां [4]प्राथम्यात् । तत्कथम् । यदैवेन्धनैरभ्याहितैः

अनादिरुपादानरूपेण, अनन्तो ब्रह्मज्ञानात्प्रागन्तासम्भवात्, प्रत्येकं शरीरिभिर्हातव्यो दुःखरूपत्वादित्यनेन यदाहुरेकजीववादिन एकं चैतन्यमेकयैवाविद्यया बद्धं संसरति । तदेव कदाचिन्मुच्यते नास्मदादीनां बन्धमोक्षौ स्त इति तदपास्तं भवति । [5]श्रुतिबहिष्कृतत्वात् । सुषुप्तेऽपि क्रियाकारकफलभेदरूपस्य प्रहाणं भवति, बुद्धिपूर्वकप्रहाणस्य ततो विशेषमाह—**सामस्त्येनेति**। स्वोपाध्यविद्याकार्यस्याविद्याप्रहाणेनाऽऽत्यन्तिकप्रहाणं विद्याफलमित्यर्थः। अमरोऽपक्षयरहितः । अमृतो नाशरहित इत्यर्थः । अपरविद्यायाः परविद्यायाश्च विषयौ प्रदर्श्य पूर्वमपरविद्याया विषयप्रदर्शने श्रुतेरभिप्रायमाह—**पूर्वं तावदिति** । यदिष्टसाधनतयाऽनिष्टसाधनतया वा वेदेन बोध्यते कर्म तस्यासति प्रतिबन्धे तत्साधनत्वाव्यभिचारः सत्यत्वं न स्वरूपाबाध्यत्वं 'प्लवा ह्येते' इत्यादिना निन्दितत्वात्। स्वरूपबाध्यत्वेऽपि चार्थक्रियासामर्थ्यं स्वप्नकामिन्यामिव घटत इत्यभिप्रेत्याऽऽह—**तदेतत्सत्यमिति**। ऋग्वेदविहितः पदार्थो हौत्रम्। यजुर्वेदविहित आध्वर्यवम्। सामवेदविहित औद्गात्रम्।तद्रूपायां त्रेतायामित्यर्थः। सत्यकामा मोक्षकामा इति समुच्चयाभिप्रायेण व्याख्यानमयुक्तम् । 'एष वः पन्थाः सुकृतस्य लोके' इति स्वर्गफलसाधनत्वविषयवाक्यशेषविरोधादिति ॥१॥

आहवनीयस्य दक्षिणोत्तरपार्श्वयोराज्यभागाविज्येते अग्नये स्वाहा सोमाय स्वाहेति दर्शपूर्णमासे । तयो-

---

१. अत्र मतान्तरे—अस्य पूर्वमन्त्रशेषत्वात् तदेतद्ब्रह्म सत्यं नित्यमित्यर्थः । माध्वमतेपि ब्रह्म सत्यं इतरेषां सत्यत्वप्रदर्मित्यर्थः इत्युक्तम्—उभयत्रापि एतत्पदस्य वक्ष्यमाणपरत्वस्य स्वारसिकत्वात् 'यथा सुदीप्तादि'ति वाक्योपक्रमस्थतदेतत्सत्यमित्यस्य वक्ष्यमाणपरत्वस्योभयसम्मतत्वात् इदमयुक्तमन्यथा तत्रापि कर्म सत्यमित्यर्थाङ्गीकारापत्तेः ।

२. सविशेषणा स्वविषयीभूताक्षरसहिता ।

३. एतेन ब्राह्मणवाक्यान्येव कर्मविधायकानि । मन्त्रास्तु प्रयोगसमवेतार्थस्मारका इति मीमांसकमतं प्रत्युक्तम्, इदं 'मन्त्रेषु कर्माणि' इति छान्दोग्यवाक्यभाष्यतट्टीकासु स्पष्टम् ।

४. आधानाख्ये श्रौतकर्मणि कृते त्रेताग्निसम्पत्तौ प्रथममग्निहोत्रं कर्तव्यम् ।

५. "यो यो देवानां प्रत्यबुध्यत स एव तदभवदि"ति बृहदारण्यकविरोधात् ।

यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च ।
अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति ॥ ३ ॥
काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः ॥ ४ ॥
एतेषु यश्चरते भ्राजमानेषु यथाकालं चाऽऽहुतयो ह्याददायन् ।
तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः ॥ ५ ॥

सम्यगिद्धे समिद्धे हव्यवाहने लेलायते चलत्यर्चिस्तदा तस्मिन्काले लेलायमाने चलत्यर्चिष्याज्यभागावाज्यभागयोरन्तरेण मध्य [1]आवापस्थाने आहुतीः प्रतिपादयेत्प्रक्षिपेद्देवतामुद्दिश्य। अनेकाहः प्रयोगापेक्षयाऽऽहुतीरिति बहुवचनम् ॥२॥

एष सम्यगाहुतिप्रक्षेपादिलक्षणः कर्ममार्गो लोकप्राप्तये पन्थास्तस्य च सम्यक्करणं दुष्करम्। [2]विपत्तयस्त्वनेका भवन्ति। कथं, यस्याग्निहोत्रिणोऽग्निहोत्रमदर्शं दर्शाख्येन कर्मणा वर्जितम्। अग्निहोत्रिणोऽवश्यकर्तव्यत्वाद्दर्शस्य। अग्निहोत्रिसम्बन्ध्यग्निहोत्रविशेषणमिव भवति तदक्रियमाणमित्येतत्। तथाऽपौर्णमासमित्यादिष्वप्यग्निहोत्रविशेषणत्वं द्रष्टव्यम्। अग्निहोत्रा[न]ङ्गत्वस्याविशिष्टत्वात्, अपौर्णमासं पौर्णमासकर्मवर्जितम्। [3]अचातुर्मास्यं चतुर्मास्यकर्मवर्जितम्। अनाग्रयणमाग्रयणं शरदादिकर्तव्यं तच्च न क्रियते यस्य। तथाऽतिथिवर्जितं चातिथिपूजनं चाहन्यहन्यक्रियमाणं यस्य, स्वयं सम्यगग्निहोत्रकालेऽहुतम्। अदर्शादिवदवैश्वदेवं वैश्वदेवकर्मवर्जितं हूयमानमप्यविधिना हुतं न यथाहुतमित्येतत्। एवं दुःसम्पादितमसम्पादितमग्निहोत्राद्युपलक्षितं कर्म किं करोतीत्युच्यत आसप्तमान्सप्तमसहितांस्तस्य कर्तुर्लोकान्हिनस्ति हिनस्तीवाऽऽयासमात्रफलत्वात्। सम्यक्क्रियमाणेषु हि कर्मसु कर्मपरिणामानुरूपेण भूरादयः सत्यान्ताः सप्त लोकाः फलं प्राप्यन्ते। ते लोका एवंभूतेनाग्निहोत्रादिकर्मणा त्वप्राप्त्यर्वाद्धिस्यन्त इवाऽऽयासमात्रं त्वव्यभिचारीत्यतो हिनस्तीत्युच्यते। पिण्डदानाद्यनुग्रहेण वा सम्बध्यमानाः पितृपितामहप्रपितामहाः पुत्रपौत्रप्रपौत्राः स्वात्मोपकाराः सप्त लोका उक्तप्रकारेणाग्निहोत्रादिना न भवन्तीति हिंस्यन्त इत्युच्यते ॥ ३ ॥

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः। काल्याद्या विश्वरुच्यन्ता लेलायमाना अग्नेर्हविराहुतिग्रसनार्था एताः सप्त जिह्वाः ॥ ४ ॥
एतेष्वग्निजिह्वाभेदेषु योऽग्निहोत्री चरते कर्माऽऽचरत्यग्निहोत्रादि भ्राजमानेषु दीप्यमानेषु। यथाकालं च

र्मध्येऽन्ये यागा अनुष्ठीयन्ते। तन्मध्यमावापस्थानमुच्यते। अग्निहोत्राहुत्योर्द्वित्वं प्रसिद्धम्। सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातः। अग्नये स्वाहा प्रजापतये स्वाहेति सायम्। तत्कथमग्निहोत्रं प्रक्रम्याऽऽहुतीरिति बहुवचनं तत्राऽऽह— **अनेकाहेति**। अनेकेष्वहःसु प्रयोगाः अनुष्ठानानि तदपेक्षयेत्यर्थः ॥ २ ॥

दर्शस्याग्निहोत्राङ्गत्वे प्रमाणाभावात्कथं तदकरणमग्निहोत्रस्य विपत्तिरित्याशङ्क्य यावज्जीवचोदनावशादग्निहोत्रिणोऽवश्यकर्तव्यत्वात्तदकरणं भवेद्विपत्तिरित्यभिप्रेत्य विशेषणम्। शरदादिषु नूतनान्नेन कर्तव्यमाग्रयणं कर्म। अदर्शादिवदवैश्वदेवमिति विशेषणम्। वैश्वदेवस्याग्निहोत्रानङ्गत्वेऽप्यावश्यकत्वादित्यर्थः। पिण्डोदकदानेन पित्रादीनां त्रयाणामुपकरोति यजमानः पुत्रादीनां च त्रयाणां ग्रासादिदानेन। ततो मध्यवर्तिना यजमानेन सम्बध्यमानाः पूर्वे त्रय उत्तरे च त्रयो गृह्यन्त इत्याह—**पिण्डदानादीति** ॥ ३-४-५ ॥

१. यद्यपि आज्यभागौ नाग्निहोत्रे स्तः तथापि होमः अग्निमध्ये आज्यादिप्रक्षेपस्थाने कर्तव्यः। आज्यभागौ अग्नेः दक्षिणोत्तरभागयोः क्रियेते। तन्मध्यस्थानं आवापस्थानम्।

२. मन्त्रलोपतन्त्रलोपदक्षिणालोपादिषु हविषः अपाके च प्रायश्चित्ताभिधानात्।

३. अक्षय्यसुकृतफलकः चातुर्मास्याख्यः कर्मसमुदायः। तस्य, वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीयाख्यानि चत्वारि पर्वाणि। एकैकं पर्व बहुयागघटितम्। चतुर्षु चतुर्षु मासेषु एकैकं पर्व कर्तव्यम्। वरुणप्रघासान्ते अवभृथश्च। अवैश्वदेवं–वैश्वदेवं स्मार्तकर्म अन्नसंस्कारार्थं आत्मसंस्कारार्थं च प्रत्यहं कर्तव्यम्। तत्राष्टौ होमाः–ततः सर्वदेवताभ्यो बलिहरणं च यथाविधि कार्यम्।

एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति ।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोकः ॥ ६ ॥

प्लवा ह्येते अदृढा यज्ञरूपा [1]अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति ॥ ७ ॥

[2]अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः । ५
जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः ॥ ८ ॥

यस्य कर्मणो यः कालस्तत्कालं यथाकालं यजमानमाददायन्नाददाना आहुतयो यजमानेन निर्वर्तितास्तं नयन्ति प्रापयन्त्येता आहुतयो या इमा अनेन निर्वर्तिताः सूर्यस्य [3]रश्मयो भूत्वा रश्मिद्वारैरित्यर्थः । यत्र यस्मिन्स्वर्गे देवानां पतिरिन्द्र एकः सर्वानुपर्यधिवसतीत्यधिवासः ॥ ५ ॥

कथं सूर्यस्य रश्मिभिर्यजमानं वहन्तीत्युच्यते—एह्येहीत्याह्वयन्त्यः । सुवर्चसो दीप्तिमत्यः । किञ्च प्रियामिष्टां १०
वाचं स्तुत्यादिलक्षणामभिवदन्त्य उच्चारयन्त्योऽर्चयन्त्यः पूजयन्त्यश्चैष वो युष्माकं पुण्यः सुकृतः पन्था ब्रह्मलोकः फलरूपः । एवं प्रियां वाचमभिवदन्त्यो वहन्तीत्यर्थः । ब्रह्मलोकः स्वर्गः [4]प्रकरणात् ॥ ६ ॥

एतच्च ज्ञानरहितं कर्मैतावत्फलमविद्याकामकर्मकार्यमतोऽसारं दुःखमूलमिति निन्द्यते । प्लवा विनाशिन
इत्यर्थः । हि यस्मादेतेऽदृढा अस्थिरा यज्ञरूपा यज्ञस्य रूपाणि यज्ञरूपा यज्ञनिर्वर्तका अष्टादशाष्टादशसंख्याकाः षोडशर्त्विजः पत्नी यजमानश्चेत्यष्टादश । एतदाश्रयं कर्मोक्तं कथितं शास्त्रेण येष्वष्टादशस्ववरं केवलं ज्ञानवर्जितं १५
कर्म । अतस्तेषामवरकर्माश्रयाणामष्टादशानामदृढतया प्लवत्वात् प्लवते सह फलेन तत्साध्यं कर्म कुण्डविनाशादिव क्षीरदध्यादीनां तत्स्थानां नाशः । यत एवमेतत्कर्म श्रेयः श्रेयःकरणमिति येऽभिनन्दन्त्यभिहृष्यन्त्यविवेकिनो मूढा अतस्ते जरां च मत्युं च जरामृत्युं किञ्चित्कालं स्वर्गे स्थित्वा पुनरेवापि यन्ति भूयोऽपि गच्छन्ति ॥ ७ ॥

किञ्चाविद्यायामन्तरे मध्ये वर्तमाना अविवेकप्रायाः स्वयं वयमेव धीरा धीमन्तः पण्डिता विदितवेदित-
व्याश्चेति मन्यमाना आत्मानं सम्भावयन्तस्ते च जङ्घन्यमाना जरारोगाद्यनेकानर्थव्रातैर्हन्यमाना भृशं पीड्यमानाः २०
परियन्ति विभ्रमन्ति मूढाः। दर्शनवर्जितत्वादन्धेनैवाचक्षुष्केणेव नीयमानाः प्रदर्श्यमानमार्गा यथा लोकेऽन्धा अक्षिरहिता गर्तकण्टकादौ पतन्ति तद्वत् ॥ ८ ॥

आहुतयो यजमानं वहन्तीति सम्बन्धः ॥ ६ ॥
रूप्यते निरूप्यते यदाश्रयतया यज्ञस्ते यज्ञरूपाः ॥ ७ ॥
स्वयमेवेति तत्त्वदर्श्युपदेशानपेक्षतया स्वमनोरथेनैवेत्यर्थः ॥ ८ ॥ २५

---

१. अष्टादश—अध्वर्युः, प्रतिप्रस्थाता, नेष्टा, उन्नेता इत्यध्वर्युगणः । ब्रह्मा, ब्राह्मणाच्छंसी, अग्नीत्, पोता इति ब्रह्मगणः । होता, मैत्रावरुणः, अच्छावाकः, ग्रावस्तुत् इति होतृगणः । उद्गाता, प्रस्तोता, प्रतिहर्ता, सुब्रह्मण्य इत्युद्गातृगणः । यजमानः, पत्नी चेति अष्टादश । अष्टादशोक्तमित्यत्र माध्वैः अष्टादशविद्यास्थाननिरूपितं कर्मेति व्याख्यातम् । अष्टादशस्मृत्युक्तमिति रामानुजीये ।

२. अत्र माध्वाः–अविद्यापदेन विद्यातोऽन्या सर्वाप्यविद्येति व्याचक्रुः । एवं कठवल्ल्यामपि । मतान्त- ३०
रीयास्तु–कठवल्ल्यामविद्या–काम्यकर्मेत्यूचुः । अत्राप्ययमेवार्थस्तेषां मते । भगवत्पादमते तु अविद्या भावरूपाविद्या मूलप्रकृतिः सर्वत्र ग्राह्या । तया मोमुह्यमानाः कष्टामापदं प्राप्नुवन्तीत्यर्थः । विद्या-विरोधित्वात् विद्याविनाश्यत्वाच्चाविद्योच्यते ।

३. रश्मयो भूत्वा—रश्मिभिः संयुज्य ।

४. कर्मप्रकरणात् ब्रह्मलोकस्याहङ्ग्रहोपासनामात्रेण प्राप्यत्वात् । ३५

[1]अविद्यायां [2]बहुधा वर्तमाना वयं [3]कृतार्था इत्यभिमन्यन्ति बालाः ।
यत्कर्मिणो न प्रवेदयन्ति रागात्तेनाऽऽतुराः क्षीणलोकाश्च्यवन्ते[4] ॥ ९ ॥
इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति ॥ १० ॥
तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वाँसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ ११ ॥

किञ्चाविद्यायां बहुधा बहुप्रकारं वर्तमाना वयमेव कृतार्थाः कृतप्रयोजना इत्येवमभिमन्यन्त्यभिमानं कुर्वन्ति बाला अज्ञानिनः । यद्यस्मादेवं कर्मिणो न प्रवेदयन्ति तत्त्वं न जानन्ति रागात्कर्मफलरागाभिभवनिमित्तं तेन कारणेनाऽऽतुरा दुःखार्ताः सन्तः क्षीणलोकाः क्षीणकर्मफलाः स्वर्गलोकाच्च्यवन्ते ॥ ९ ॥

इष्टापूर्तम्। इष्टं यागादि[4] श्रौतं कर्म। पूर्तं वापीकूपतडागादि[5] स्मार्तं मन्यमाना एतदेवातिशयेन पुरुषार्थसाधनं वरिष्ठं प्रधानमिति चिन्तयन्तोऽन्यदात्मज्ञानाख्यं श्रेयःसाधनं न वेदयन्ते न जानन्ति प्रमूढाः पुत्रपशुबन्ध्वादिषु प्रमत्ततया मूढास्ते च नाकस्य स्वर्गस्य पृष्ठ उपरिस्थाने सुकृते भोगायतनेऽनुभूय कर्मफलं पुनरिमं लोकं मानुषमस्माद्धीनतरं वा तिर्यङ्नरकादिलक्षणं यथाकर्मशेषं[6] विशन्ति ॥ १० ॥

ये पुनस्तद्विपरीता ज्ञानयुक्ता वानप्रस्थाः संन्यासिनश्च—तपःश्रद्धे हि तपः स्वाश्रमविहितं कर्म। श्रद्धा हिरण्यगर्भादिविषया विद्या ते तपःश्रद्धे उपवसन्ति सेवन्तेऽरण्ये वर्तमानाः सन्तः । शान्ता उपरतकरणग्रामाः । विद्वांसो गृहस्थाश्च ज्ञानप्रधाना इत्यर्थः । भैक्षचर्यां चरन्तः परिग्रहाभावादुपवसन्त्यरण्य इति सम्बन्धः । सूर्यद्वारेण सूर्योपलक्षितेनोत्तरायणेन पथा ते विरजा विरजसः [7]क्षीणपुण्यपापकर्माणः सन्त इत्यर्थः । प्रयान्ति प्रकर्षेण यान्ति यत्र यस्मिन्सत्यलोकादावमृतः स पुरुषः प्रथमजो हिरण्यगर्भो ह्यव्ययात्माऽव्ययस्वभावो यावत्संसारस्थायी । एतदन्तास्तु संसारगतयोऽपरविद्यागम्याः । ननु—एतं मोक्षमिच्छन्ति केचित्[8], न, 'इहैव सर्वे प्रविलीयन्ति कामाः' 'ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाऽऽविशन्ती'त्यादिश्रुतिभ्योऽप्रकरणाच्च । अपरविद्याप्रकरणे हि प्रवृत्ते न

कं सुखं न भवतीत्यकं दुःखं तन्न विद्यते यस्मिन्नसौ नाकः ॥ ९-१० ॥

केवलकर्मिणां फलमुक्त्वा सगुणब्रह्मज्ञानसहिताश्रमकर्मिणां फलं संसारगोचरमेव दर्शयति—**ये पुनस्तद्विपरीता ज्ञानयुक्ता इत्यादिना** । अरण्ये स्त्रीजनासङ्कीर्णे देशे । मुक्तानामिहैव सर्वकामप्रविलयं सर्वात्मभावं च दर्शयन्ति श्रुतयः । ब्रह्मलोकप्राप्तिस्तु देशपरिच्छिन्नं फलं ततो न मोक्ष इत्याह—**इहैवेति** । ब्रह्मा चतुर्मुखः ।

---

१. अविद्यावस्थायामहंममाभिमानिन इत्यर्थः ।
२. विविधव्यापारेण ।
३. धनार्जनपुत्रपौत्रादिसुखेन कृतार्थबुद्धयः ।
४. च्यवन्ते—पञ्चाग्निद्वारा पुनरागच्छन्ति ।
५. अत्रादिपदेनाग्निहोत्रतपःसत्यवेदानुपालनातिथ्यवैश्वदेवा ग्राह्याः ।
६. अत्रादिपदेन देवालयनिर्माणान्नप्रदानारामनिर्माणानि गृह्यन्ते ।
७. कर्मशेषः—स्वर्गार्थकर्मणोऽन्यत् कर्मेति निर्णीतं ब्रह्मसूत्रेषु—कृतात्ययेऽनुशयवान् इत्यादिना (३।१।८)
८. ब्रह्मलोकसाधनपुण्यातिरिक्तपुण्यं क्षीणं येषामित्यर्थः ।
९. ननु एतं मोक्षमिच्छन्ति—इति रामानुजीयानां माध्वानां च मतं 'अनागतावेक्षणन्यायेन' निरस्यति भगवान्—इदं हि प्रकरणं 'तदेतत्सत्यमि'त्यारभ्यापरविद्यापरम् । उत्तरत्र 'तदेतत्सत्यमि'त्यारभ्य परविद्याप्रकरणं भविष्यति । अत्रैव परविद्याभिधाने तदेतत्सत्यमित्युत्तरत्र किमपूर्वं वक्तव्यमिति वदेयुः । अस्यैव विवरणमुत्तरग्रन्थ इति चेत् तदा तदेतत्सत्यमित्यपूर्वतया प्रस्तावानुपपत्तिश्च ।

परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन[1] ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १२ ॥

ह्यकस्मान्मोक्षप्रसङ्गोऽस्ति विरजस्त्वं त्वापेक्षिकं समस्तमपरविद्याकार्यं साध्यसाधनलक्षणं क्रियाकारकफलभेदभिन्नं द्वैतम् । एतावदेव यद्धिरण्यगर्भप्राप्त्यवसानम् । तथा च मनुनोक्तं स्थावराद्यां संसारगतिमनुक्रामता—

"ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च । उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः ॥" इति ॥ ११ ॥ ५

अथेदानीमस्मात्साध्यसाधनरूपात्सर्वस्मात्संसाराद्विरक्तस्य परस्यां विद्यायामधिकारप्रदर्शनार्थमिदमुच्यते—

परीक्ष्य यदेतदृग्वेदाद्यपरविद्याविषयं स्वाभाविकाविद्याकामकर्मदोषवत्पुरुषानुष्ठेयमविद्यादिदोषवन्तमेव पुरुषं प्रति विहितत्वात्तदनुष्ठानकार्यभूताश्च लोका ये दक्षिणोत्तरमार्गलक्षणाः फलभूता ये च विहिताकरणप्रतिषेधातिक्रमदोषसाध्या नरकतिर्यक्प्रेतलक्षणास्तानेतान्परीक्ष्य [2]प्रत्यक्षानुमानोपमानागमैः सर्वतो याथात्म्येनावधार्य लोकान्संसारगतिभूतान [3]व्यक्तादिस्थावरान्तान्व्याकृताव्याकृतलक्षणान्बीजाङ्कुरवदितरेतरोत्पत्तिनिमित्तान[4] नेकानर्थशतसहस्रसङ्कुलान्कदलीगर्भवदसारान्मायामरीच्युदकगन्धर्वनगराकारस्वप्नजलबुद्बुदफेनसमान्प्रतिक्षणप्रध्वंसान्पृष्ठतः कृत्वाऽविद्याकामदोषप्रवर्तितकर्मचितान्धर्माधर्मनिर्वर्तितानित्येतद्ब्राह्मणस्यैव [5]विशेषतोऽधिकारः सर्वत्यागेन ब्रह्मविद्यायामिति ब्राह्मणग्रहणम् । परीक्ष्य लोकान्कि कुर्यादित्युच्यते—निर्वेदं निःपूर्वो विदिरत्र वैराग्यार्थे वैराग्यमायात्कुर्यादित्येतत् । स वैराग्यप्रकारः प्रदर्श्यते । इह संसारे नास्ति कश्चिदप्यकृतः पदार्थः । सर्व एव हि लोकाः कर्मचिताः कर्मकृतत्वाच्चानित्याः । न नित्यं किञ्चिदस्तीत्यभिप्रायः । सर्वं तु कर्मानित्यस्यैव साधनम् । यस्माच्चतुर्विधमेव हि सर्वं कर्मकार्यम्, १५

विश्वसृजः प्रजापतयो मरीचिप्रभृतयः । धर्मो यमः । महान्सूत्रात्मा । अव्यक्तं त्रिगुणात्मिका प्रकृतिः । सात्त्विकीं सत्त्वपरिणामज्ञानसहितकर्मफलभूतामित्यर्थः ॥ ११ ॥

ऐहिककर्मफलस्य पुत्रादेर्नाशविषयं प्रत्यक्षं, विमतमनित्यं कृतकत्वात् घटवदित्यनुमानमामुष्मिकनाशविषयम् । तद्यथेह कर्मजितो लोकः क्षीयत इत्याद्यागमस्तैरनित्यत्वेन सर्वात्मनाऽवधार्येत्यर्थः ।

"नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च । २०
शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः ॥"

---

१. नास्त्यकृतः कृतेन—अत्र कल्पतरौ 'नास्त्यकृतः मोक्षः किं कृतेन कर्मणा प्रयोजनं' इति वाक्यं भित्वा व्याख्यातम् । यथाश्रुते कृतेन कर्मणा अकृतो लोको नास्तीति योजनायां लोकत्वावच्छिन्नः सर्वोऽपि कृतक इति परीक्षास्वरूपालाभात् । अतः किंशब्दाध्याहारः वाक्यभेदश्च स्वीकृतः (परि०) । अत्र कृतेन कर्मणा अकृतो मोक्षः न प्राप्यत इति व्याख्यानं मतत्रयसिद्धान्तः । एवं सति ज्ञानकर्मसमुच्चयो मोक्षसाधनमिति २५ वदन्तः रामानुजीयाः एतच्छास्त्रविरुद्धमेव वदन्ति ।

२. अत्र प्रमाणचतुष्टयेनापि संसारयाथात्म्यनिर्धारणमुच्यते । तदेव टीकाकारैः ऐहिकेत्यादिना विवृतम् । उपमानं तु यथा गोसदृशो गवय इति वाक्यं श्रुत्वा अरण्यं गतः गोसदृशं पिण्डं दृष्ट्वा 'एतत्सदृशी मदीया गौः' इत्युपमितिं लभते तथा परेषां उच्चपदस्थितानां पतनं दृष्ट्वा ममापीयमेव गतिरिति उपमानेनानित्यत्वज्ञानम् । ३०

३. अव्यक्तभावोऽपि सुषुप्तिवत् प्रकृतिलयरूपः पुरुषार्थ इति पौराणिकाः । यदाहुः—"दशवर्षसहस्राणि तिष्ठन्त्यव्यक्तचिन्तकाः" इति । अत्र कर्मचितान् परित्यज्येत्युक्तत्वात् मोक्षस्य कर्मसाध्यत्वं नास्तीति सूच्यते । तेन कर्मसमुच्चितं ज्ञानं मोक्षसाधनमिति वदन्तः परास्ताः ।

४. मनुष्यलोक एव कर्माधिकारात् अयं लोकः बीजमितरेऽङ्कुराः फलत्वात् । तत्र भोगसमाप्तौ कर्मकरणायेहैवावर्तन्त इति इतरेतरोत्पत्तिनिमित्तत्वम् । ३५

५. विशेषत इति—ब्राह्मणस्यैव "ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय" "अयज्ञोपवीती कथं ब्राह्मणः" इत्यादि संन्यासविधायकशास्त्रेषु विशिष्य ब्राह्मणग्रहणादित्यर्थः । स्वातन्त्र्येण ब्रह्मान्वेषणे वेदान्तानां विपरीतार्थभ्रान्त्या यथावदात्मानं न जानीयात् । गुर्वनुग्रहश्च दृष्टद्वारा अदृष्टद्वारा च ज्ञानसाधनम् ।

[1]तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय ।
[2]येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ १३ ॥

इत्यथर्ववेदीयमुण्डकोपनिषदि प्रथममुण्डके द्वितीयः खण्डः

इत्यथर्ववेदीयमुण्डकोपनिषदि प्रथममुण्डकं समाप्तम्

उत्पाद्यमाप्यं संस्कार्यं विकार्यं वा। नातःपरं कर्मणो विशेषोऽस्ति। अहं च नित्येनामृतेनाभयेन कूटस्थेनाचलेन ध्रुवेणार्थेनार्थी न तद्विपरीतेन। अतः किं कृतेन कर्मणाऽऽसबहुलेनानर्थसाधनेनेत्येवं निर्विण्णोऽभयं शिवमकृतं नित्यं पदं यत्तद्विज्ञानार्थं विशेषेणाधिगमार्थं स निर्विण्णो ब्राह्मणो गुरुमेवाऽऽचार्यं शमदमदयादिसम्पन्नमभिगच्छेत्। शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यादित्येतद्गुरुमेवेत्यवधारणफलम्। समित्पाणिः समिद्भारगृहीतहस्तः श्रोत्रियमध्ययनश्रुतार्थसम्पन्नं ब्रह्मनिष्ठं हित्वा सर्वकर्माणि केवलेऽद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठो जपनिष्ठस्तपोनिष्ठ इति यद्वत्। न हि कर्मिणो ब्रह्मनिष्ठता सम्भवति कर्मात्मज्ञानयोर्विरोधात्। स तं गुरुं विधिवदुपसन्नः प्रसाद्य पृच्छेदक्षरं पुरुषं सत्यम् ॥ १२ ॥

तस्मै स विद्वान्गुरुर्ब्रह्मविदुपसन्नायोपगताय। सम्यग्यथाशास्त्रमित्येतत्। प्रशान्तचित्तायोपरतदर्पादिदोषाय। शमान्विताय बाह्येन्द्रियोपरमेण च युक्ताय सर्वतो विरक्तायेत्येतत्। येन विज्ञानेन यया विद्यया परयाऽक्षरमद्रेश्यादिविशेषणं तदेवाक्षरं पुरुषशब्दवाच्यं पूर्णत्वात्पुरि शयनाच्च सत्यं तदेव परमार्थस्वाभाव्यादक्षरं चाक्षरणादक्षतत्वादक्षयत्वाच्च वेद विजानाति तां ब्रह्मविद्यां तत्त्वतो यथावत्प्रोवाच प्रब्रूयादित्यर्थः। आचार्यस्याप्ययं नियमो यन्न्यायप्राप्तसच्छिष्यनिस्तारणमविद्यामहोदधेः ॥ १३ ॥

इत्यथर्ववेदीयमुण्डकोपनिषद्भाष्ये प्रथममुण्डके द्वितीयः खण्डः

इति मुण्डकोपनिषद्भाष्ये प्रथममुण्डकं समाप्तम्

इतिस्मृतेर्ब्राह्मणस्यैवाधिकार इत्यर्थः। कूटस्थेन परिणामरहितेनाचलेन स्पन्दरहितेन ध्रुवेण प्रयत्नरहितेनाहमर्थी। [3]समित्पाणिरिति विनयोपलक्षणम् ॥ १२ ॥

अक्षरणादिति। अवयवान्यथाभावलक्षणपरिणामशून्यत्वात्। **अक्षतत्वादिति। अक्षयत्वाच्चेति।** अशरीरत्वाद्विकारशून्यत्वादित्यर्थः ॥ १३ ॥

इति मुण्डकोपनिषद्भाष्यटीकायां प्रथममुण्डके द्वितीयः खण्डः

इत्यथर्ववेदीयमुण्डकोपनिषद्भाष्यटीकायां प्रथममुण्डकं समाप्तम्

---

१. अत्र 'प्रशान्तचित्ताय शमान्विताय' इत्यनेन साधनचतुष्टयं ब्रह्मविद्योपदेशायावश्यकमिति सूचितम्। 'परीक्ष्य लोकान्' इत्यनेन नित्यानित्यविवेकः, 'निर्वेदमायात्' इत्यनेन वैराग्यम्, 'प्रशान्तचित्ताय' इत्यनेन शमादिषट्कं तद्विज्ञानार्थमिति मुमुक्षुत्वं च सूचितमिति 'अथातो ब्रह्मजिज्ञासे'त्यनेन सूचितसाधनचतुष्टयमत्र प्रकटीक्रियते। "तस्मै स विद्वानुपसन्नाय ब्रह्मविद्यां ब्रूयादि"त्युक्त्या उत्तरत्रैव परविद्या आरभ्यत इति स्पष्टम्। पूर्वत्र परविद्यातत्फलवचनोक्तिरिति व्याख्या न साध्वी।

२. 'येनाक्षरं पुरुषं वेद सत्यमि'त्युक्तेः 'सत्यं ज्ञानमनन्तं' 'सदेव सोम्ये'त्यादिवाक्यप्रसिद्धं शुद्धं पारमार्थिकं ब्रह्मेत्यर्थः। न तु शिवो वा विष्णुर्वा। तदुक्तं वासिष्ठनिर्वाणे—
"न देवः पुण्डरीकाक्षो न च देवस्त्रिलोचनः। अकृत्रिममनाद्यन्तं देवनं देव उच्यते" ॥ इत्यादि
न च पुरुषशब्दः श्रीविष्णौ रूढ इति वाच्यम्। 'पुरुषं कृष्णपिङ्गलं' 'पुरुषस्य सहस्राक्षस्य महादेवस्ये'त्यादौ श्रीशिवेऽपि प्रयोगात्। विष्णौ रूढत्वे अन्तस्तद्धर्माधिकरणवैयर्थ्यापत्तेश्च।

३. अत्र 'ब्रह्मनिष्ठमि'त्युक्त्या संन्यासीति भाष्यकारैः सूच्यते। एवं तर्हि समिद्भिः तस्य किं कार्यं येन तद्गृहीत्वा तं प्रति गच्छेत् इति शङ्कानिरासाय विनयोपलक्षणमित्युक्तम्। समित्पाणित्वं यत्र गृहस्थ एव जनकयाज्ञवल्क्याङ्गिरोवत् ब्रह्मनिष्ठोऽस्ति तं प्रति विद्यार्थितया गमने उपयोगो भवति।

तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः ।
तथाऽक्षराद्विविधाः[1] सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति ॥ १ ॥
दिव्यो ह्यमूर्तः पुरुषः [2]सबाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥२॥

अपरविद्यायाः सर्वं कार्यमुक्तम् । स च संसारो यत्सारो यस्मान्मूलादक्षरात्सम्भवति यस्मिंश्च प्रलीयते तदक्षरं पुरुषाख्यं सत्यम् । यस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवति तत्परस्या ब्रह्मविद्याया विषयः स वक्तव्य इत्युत्तरो ग्रन्थ आरभ्यते । यदपरविद्याविषयं कर्मफललक्षणं सत्यं तदापेक्षिकम् । इदं तु परविद्याविषयं परमार्थतः सल्लक्षणत्वात् तदेतत्सत्यं यथाभूतं विद्याविषयम् । अविद्याविषयत्वाच्चानृतमितरत् । अत्यन्तपरोक्षत्वात्कथं नाम प्रत्यक्षवत्सत्यमक्षरं प्रतिपद्येरन्निति दृष्टान्तमाह—यथा सुदीप्तात्सुष्ठु दीप्तादिद्धात्पावकादग्नेर्विस्फुलिङ्गा अग्न्यवयवाः सहस्रशोऽनेकः प्रभवन्ते निर्गच्छन्ति सरूपा अग्निसलक्षणा एव तथोक्तलक्षणादक्षराद्विविधा नानादेहोपाधिभेदमनुविधीयमानत्वाद्विविधा हे सोम्य भावा जीवा आकाशादिवद्घटादिपरिच्छिन्नाः सुषिरभेदा घटाद्युपाधिप्रभेदमनु भवन्ति । एवं नानानामरूपकृतदेहोपाधिप्रभवमनुप्रजायन्ते । तत्र चैव तस्मिन्नेवाक्षरेऽपियन्ति देहोपाधिविलयमनुलीयन्ते घटादिविलयमन्विव सुषिरभेदाः यथाऽऽकाशस्य सुषिरभेदोत्पत्तिप्रलयनिमित्तत्वं घटाद्युपाधिकृतमेव तद्वदक्षरस्यापि [3]नामरूपकृतदेहोपाधिनिमित्तमेव जीवोत्पत्तिप्रलयनिमित्तत्वम् ॥ १ ॥

नामरूपबीजभूतादव्याकृताख्यात्स्वविकारापेक्षया परादक्षरात्परं यत्सर्वोपाधिभेदवर्जितमक्षरस्यैव स्वरूपमाकाशस्येव [4]सर्वमूर्तिवर्जितं नेति नेतीत्यादिविशेषणं विवक्षन्नाह—दिव्यो द्योतनवान्स्वयंज्योतिष्ट्वात् । दिवि वा स्वात्मनि भवोऽलौकिको वा । हि यस्मादमूर्तः सर्वमूर्तिवर्जितः पुरुषः पूर्णः पुरिशयो वा । दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरः सह बाह्याभ्यन्तरेण वर्तत इति । अजो न जायते कुतश्चित्स्वतोऽन्यस्य जन्मनिमित्तस्य चाभावात् यथा जलबुद्बुदादेर्वाय्वादि । यथा नभःसुषिरभेदानां घटादि । सर्वभावविकाराणां जनिमूलत्वात्तत्प्रतिषेधेन सर्वे प्रतिसिद्धा

द्वे विद्ये वेदितव्ये इत्युपन्यस्यापरविद्यामाद्यमुण्डकेन प्रपञ्च्य परविद्यां सूत्रितां प्रपञ्चयितं द्वितीयमुण्डकारम्भ इत्याह—**अपरविद्याया इत्यादिना** । कर्मणोऽपि प्राक्सत्यत्वमुक्तं तद्वदिदं सत्यत्वं न मन्तव्यमित्याह—**यदपरविद्याविषयमिति** । विषीयते विशेष्यते विद्याऽनेनेति व्युत्पत्त्या विषयशब्दस्य वस्तुपरत्वान्नपुंसकलिङ्गत्वं परमार्थतः सल्लक्षणत्वादत्यन्ताबाध्यत्वादित्यर्थः । **अत्यन्तपरोक्षत्वादिति** । [5]शास्त्रैकगम्यत्वात् । अपूर्ववद्ब्रह्मणः प्रत्यक्षत्वं न सम्भवति साक्षात्काराधीनं च कैवल्यं ततः कथं नाम सत्यमक्षरं प्रत्यक्षवत्प्रतिपद्येरन्मुमुक्षव इत्यभिप्रेत्य जीवब्रह्मणोरेकत्वे दृष्टान्तमाह—**यथा सुदीप्तादिति** । एकत्वे सति प्रत्यग्रूपस्यापरोक्षत्वाद्ब्रह्मणोऽपि प्रत्यक्षत्वं भविष्यति घटैकदेशप्रत्यक्षत्वे घटप्रत्यक्षवदित्यर्थः । विभक्तदेशावच्छिन्नत्वेन विस्फुलिङ्गेष्ववयवत्वादिव्यवहारः, स्वतः पुनरग्न्यात्मत्वमेवोष्णप्रकाशत्वाविशेषात्तथा चिद्रूपत्वाविशेषाज्जीवानां स्वतो ब्रह्मत्वमेवेत्यर्थः ॥ १ ॥

अक्षरस्यापि जीवोत्पत्तिप्रलयनिमित्तत्वमौपाधिकमुक्तमेकत्वसिद्ध्यर्थम्। तत्त्वतस्तु निमित्तनैमित्तिकभावोऽपि नास्तीत्याह—**नामरूपबीजभूतादिति** । देहापेक्षया यद्बाह्यमान्तरं च प्रसिद्धं तेन सह तत्तादात्म्येन तदधिष्ठानतया वा वर्तत इति सबाह्याभ्यन्तरः । अत एव सर्वात्मत्वात्तद्व्यतिरिक्तनिमित्ताभावादज इत्यर्थः । जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीयते विनश्यतीत्येवमादिभावविकाराणां निषेधे तात्पर्यमजशब्दस्याऽऽह—**सर्वभावविकाराणामिति** ।

---

१. विविधा भावाः चेतना अचेतनाश्च चेतनानां जीवानां स्वतोऽनादित्वात् तेषामुत्पत्तिः उपाध्युत्पत्तिरेव । प्रलयोऽप्युपाधिप्रलय एवेति ज्ञेयम् ।
२. सबाह्याभ्यन्तरः बाह्याभ्यन्तरसहितः सर्वात्मा । (कल्प०)
३. नामरूपकृतेति—कृतकेत्यर्थः ।
४. अप्राकृतशरीरं ब्रह्मणोऽभ्युपगन्तृनिरासायोक्तम् ।
५. शास्त्रैकगम्यत्वात् परोक्षत्वं शास्त्रैकगम्येनापरिच्छिन्नानन्दाकारेणेत्यर्थः । स्वरूपेण तु 'सन् घट' इत्यादिप्रत्यक्षविषय एव ब्रह्म ।

[1]एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥३॥

भवन्ति । सबाह्याभ्यन्तरो ह्यजोऽतोऽजरोऽमृतोऽक्षरो ध्रुवोऽभय इत्यर्थः । यद्यपि देहाद्युपाधिभेददृष्टीनामविद्यावशाद्देहभेदेषु सप्राणः समनाः सेन्द्रियः सविषय इव प्रत्यवभासते तलमलादिमदिवाऽऽकाशं तथाऽपि तु स्वतः परमार्थदृष्टीनामप्राणोऽविद्यमानः क्रियाशक्तिभेदवांश्चलनात्मको वायुर्यस्मिन्नसावप्राणः । तथाऽमना अनेकज्ञानशक्तिभेदवत्सङ्कल्पाद्यात्मकं मनोऽप्यविद्यमानं यस्मिन्सोऽयममनाः । अप्राणो ह्यमनाश्चेति प्राणादिवायुभेदाः कर्मेन्द्रियाणि तद्विषयाश्च तथा बुद्धिमनसी बुद्धीन्द्रियाणि तद्विषयाश्च प्रतिषिद्धा वेदितव्याः । तथा श्रुत्यन्तरे—[2]ध्यायतीव लेलायतीवेति । यस्माच्चैवं प्रतिषिद्धोपाधिद्वयस्तस्माच्छुभ्रः शुद्धः । अतोऽक्षरान्नामरूपबीजोपाधिलक्षितस्वरूपात्सर्वकार्यकारणबीजत्वेनोपलक्ष्यमाणत्वात्परं तदुपाधिलक्षणमव्याकृताख्यमक्षरं सर्वविकारेभ्यस्तस्मात्परतोऽक्षरात्परो निरुपाधिकः पुरुष इत्यर्थः । यस्मिंस्तदाकाशाख्यमक्षरं सव्यवहारविषयमोतं प्रोतं च । कथं पुनरप्राणादिमत्त्वं तस्येत्युच्यते । यदि हि प्राणादयः प्रागुत्पत्तेः पुरुष इव स्वेनाऽऽत्मना सन्ति तदा पुरुषस्य प्राणादिना विद्यमानेन प्राणादिमत्त्वं भवेन्न तु ते प्राणादयः प्रागुत्पत्तेः पुरुष इव स्वेनाऽऽत्मना सन्ति तदा। अतोऽप्राणादिमान्परः पुरुषः। यथाऽनुत्पन्ने पुत्रेऽपुत्रो देवदत्तः ॥ २ ॥

कथं ते न सन्ति प्राणादय इत्युच्यते । यस्मादेतस्मादेव पुरुषान्नामरूपबीजोपाधिलक्षिताज्जायत उत्पद्यतेऽविद्याविषयविकारभूतो नामधेयोऽनृतात्मकः प्राणः "वाचारम्भणं विकारो नामधेयमनृतम्" इति श्रुत्यन्तरात् । न हि तेनाविद्याविषयेणानृतेन प्राणेन सप्राणत्वं परस्य स्यादपुत्रस्य स्वप्नदृष्टेनेव पुत्रेण सपुत्रत्वम् । एवं मनः सर्वाणि चेन्द्रियाणि विषयाश्चैतस्मादेव जायन्ते । तस्मात्सिद्धमस्य निरुपचरितमप्राणादिमत्त्वमित्यर्थः । यथा च प्रागुत्पत्तेः परमार्थतोऽसन्तस्तथा प्रलीनाश्चेति द्रष्टव्याः । यथा करणानि मनश्चेन्द्रियाणि तथा शरीरविषयकारणानि भूतानि

जीवानां प्राणादिमत्त्वात्तदात्मत्वे ब्रह्मणोऽपि प्राणादिमत्त्वं प्राप्तं तन्निवर्तयति—यद्यपीत्यादिना । स्मृतिसंशयाद्यनेकज्ञानेषु शक्तिविशेषोऽस्यास्तीति तथोक्तं; नामरूपयोर्बीजं ब्रह्म तस्योपाधितया लक्षितं शुद्धस्य कारणत्वानुपपत्त्या गमितं स्वरूपमस्येति तथोक्तम् । तस्मादुपाधिरूपात्तद्विशिष्टरूपाच्च परतोऽक्षरात्पर इति सम्बन्धः । कथं मायातत्त्वस्याक्षरस्य परत्वमित्याकाङ्क्षायामाह—सर्वकार्येति । कार्यं ह्यपरं प्रसिद्धम् । तत्कारणत्वेन गम्यमानत्वान्मायातत्त्वं परम् । यौक्तिकबाधादनिर्वाच्यत्वेऽपि स्वरूपोच्छेदाभावादक्षरम् । तदुक्तं गीतायाम्—

"क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इति ॥ २ ॥

यदेव चैतन्यं निरुपाधिकं शुद्धमविकल्पं ब्रह्म यत्तत्त्वज्ञानाज्जीवानां कैवल्यं तदेव मायाप्रतिबिम्बितरूपेण कारणं भवतीत्याह—यस्मादेतस्मादेवेति । प्राणोत्पत्तेरूर्ध्वं तर्हि सप्राणत्वं परमात्मनो भविष्यतीतिशङ्कानिवृत्त्यर्थं श्रुत्यन्तरप्रसिद्धं प्राणस्य विशेषणमाह—अविद्याविषय इति । नामधेय इति । वाङ्मात्रो न वस्तुवृत्त इत्यर्थः । प्राणादीनां पाठक्रमोऽयमर्थक्रमेण बाध्यते[3] । "गता कलाः पञ्चदश प्रतिष्ठाः" इति भूतेषु लयश्रवणेन प्राणानां भौतिकत्वावगमाद्भूतोत्पत्त्यनन्तरं प्राणोत्पत्तिर्द्रष्टव्येति । अभिमुखमागच्छन्वायुरावहः पुरतो गच्छन्प्रवह इत्यादिभेदः । शब्दस्पर्शरूपरसगन्धा उत्तरोत्तरस्य गुणा येषां तानि तथोक्तानि । [4]यथा शुक्लतन्त्ववस्थापन्नादन्वयिकारणा-

---

१. 'प्राणो जायत' इत्युक्त्या प्राणस्यानादित्वपूर्वपक्षो निरस्तः । 'आनीदवातमि'ति श्रुतौ ईश्वरस्य प्रलये प्राणनश्रवणं तु प्राणं विनापि सद्भावपरं ज्ञेयम् । 'एतस्माज्जायते प्राणः' इति श्रुतिश्च क्रमबोधकपदरहिता तैत्तिरीयस्थक्रमबोधकश्रुत्यनुसारेण नेतव्या । इमे परस्माद्ब्रह्मण उत्पन्ना इत्यत्र तात्पर्यं न तु क्रमे । 'प्राणा वाव ऋषयः तेऽग्रेऽसदासीत्' इत्यस्याः श्रुतेरपि प्राणानां बहुत्वोत्पत्तिश्रुतेः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुरोधाच्चोत्पत्तिरेव । असत्त्वमनभिव्यक्तरूपेण सत्ता । (ब्र. सू. २.४.१)

२. अत्र स्वतो ध्यानचलनाभावात् मनःप्राणधर्माणां ध्यानचलनादीनामारोपस्यार्थसिद्धत्वात् प्राणमनः शून्यत्वं सिद्ध्यति ।

३. पू. मी. ५.१.२ ।

४. तदभिध्यानादेव तु तल्लिङ्गात् सः (२-३-१३) इति सूत्रप्रतिपाद्यार्थं मनसि कृत्वा आह—शुक्लतन्त्ववस्थापन्नात् इत्यादि ।

[1]अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः ।
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ ४ ॥
तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्याम् ।
पुमान्रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात्सम्प्रसूताः ॥ ५ ॥

खमाकाशं वायुरन्तर्बाह्य आवहादिभेदः । ज्योतिरग्निः । आप उदकम् । पृथिवी धरित्री विश्वस्य सर्वस्य धारिणी । एतानि च शब्दस्पर्शरूपरसगन्धोत्तरोत्तरगुणानि पूर्वपूर्वगुणसहितान्येतस्मादेव जायन्ते ॥ ३ ॥

संक्षेपतः परविद्याविषयमक्षरं निर्विशेषं पुरुषं सत्यं 'दिव्यो ह्यमूर्तः' इत्यादिना मन्त्रेणोक्त्वा पुनस्तदेव सविशेषं विस्तरेण वक्तव्यमिति प्रववृते । संक्षेपविस्तरोक्तो हि पदार्थः सुखाधिगम्यो भवति सूत्रभाष्योक्तिवदिति —योऽपि प्रथमजात्प्राणाद्धिरण्यगर्भाज्जायतेऽण्डस्यान्तर्विराट् स तत्त्वान्तरितत्वेन लक्ष्यमाणोऽप्येतस्मादेव पुरुषाज्जायत एतन्मयश्चेत्येतदर्थमाह । तं च विशिनष्टि । अग्निर्द्युलोकः 'असौ वाव लोको गौतमाग्निः' इति श्रुतेः । मूर्धा यस्योत्तमाङ्गं शिरः । चक्षुषी चन्द्रश्च सूर्यश्चेति चन्द्रसूर्यौ यस्येति सर्वत्रानुषङ्गः कर्तव्यः । अस्येत्यस्य पदस्य वक्ष्यमाणस्य यस्येति विपरिणामं कृत्वा । दिशः श्रोत्रे यस्य । वाग्विवृता उद्घाटिताः प्रसिद्धा वेदा यस्य । वायुः प्राणो यस्य हृदयमन्तःकरणं विश्वं समस्तं जगदस्य यस्येत्येतत् । सर्वं ह्यन्तःकरणविकारमेव जगन्मनस्येव सुषुप्ते प्रलयदर्शनात् । जागरितेऽपि तत एवाग्निविस्फुलिङ्गवद्विप्रतिष्ठानात् । यस्य च पद्भ्यां जाता पृथिवी । एष देवो विष्णुरनन्तः प्रथमशरीरी त्रैलोक्यदेहोपाधिः सर्वेषां भूतानामन्तरात्मा । स हि सर्वभूतेषु द्रष्टा श्रोता मन्ता विज्ञाता सर्वकारणात्मा ॥ ४ ॥

पञ्चाग्निद्वारेण च याः संसरन्ति प्रजास्ता अपि तस्मादेव पुरुषात्प्रजायन्त इत्युच्यते । तस्मात्परस्मात्पुरुषात् [2]प्रजावस्थानविशेषरूपोऽग्निः । स विशिष्यते । समिधो यस्य सूर्यः समिध इव समिधः । सूर्येण हि द्युलोकः समिध्यते ।

ज्जायमानः पटः शुक्लगुणो जायते तथाऽऽकाशावस्थापन्नाद्ब्रह्मणो जायमानो वायुराकाशगुणेन शब्देनान्वितो जायते । तथैव वायुभावापन्नाद्ब्रह्मणोऽग्निस्तद्गुणेनान्वितो जायत इति द्रष्टव्यम् । ननु सूक्ष्माणि भूतानि प्रथममुत्पद्यन्ते । अनन्तरं तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति पञ्चीकरणोपलक्षणार्थं त्रिवृत्करणश्रुतेः पञ्चात्मकत्वमवगम्यते । तत एकैकस्य भूतस्य पञ्चगुणवत्त्वं वर्णितमन्यत्र । कथमिह पञ्चीकरणमनादृत्य प्रथमसर्ग एवाऽऽकाशस्यैकगुणत्वं वायोर्हि द्विगुणत्वं तेजसस्त्रिगुणत्वमित्याद्युच्यते । सत्यम् । भूतसर्गे तात्पर्याभावद्योतनाय प्रक्रियान्तरं न विरुध्यते । न ह्येतत्प्रतिबद्धं किञ्चित्फलं श्रूयते । अत एव गुणगुणिभावोऽपि न वैशेषिकपक्षवदिह विवक्षितः । किन्तु राहोः शिर इतिवद्व्यपदेशमात्रम् । विस्तरेण त्वन्त्यकार्यपर्यन्तं तेन तेनाऽऽकारेण ब्रह्मैव विवर्तत इति प्रपञ्च्यते ततोऽतिरिक्तस्याणुमात्रस्यासम्भवात्तस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रदर्शनार्थमित्यर्थः ॥ ३ ॥

सर्वेषां भूतानामिति । पञ्चमहाभूतानाम् । अन्तरात्मा स्थूलपञ्चभूतशरीरो हि विराडित्यर्थः । **पञ्चाग्निद्वारेण** । द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निदृष्टेः श्रुत्यन्तरचोदितत्वात्तद्द्वारेणेत्यर्थः ॥ ४-५ ॥

---

१. अग्निर्मूर्धा—इत्यादिरूपं परस्यैव ब्रह्मणः उपासनार्थं काल्पनिकं रूपमिति भाष्याभिप्रायः । पुनस्तदेव सविशेषं वक्तव्यमिति भाष्यात् । अत एव सूत्रभाष्ये अग्निर्मूर्धा इत्यादिरूपं परमेश्वरस्यैवोचितं सर्वविकारकारणत्वात् । 'एष सर्वभूतान्तरात्मा' इत्यत्र एष इति प्रकृतानुकर्षणाच्च । परं तु सूत्रभाष्य एव 'अन्ये पुनर्मन्यन्ते' इत्यारभ्य 'नायं भूतयोनेः रूपोपन्यासः सम्भवति जायमानत्वेन निर्देशात् । अपि तु प्रथमशरीरस्य विराट्पुरुषस्यायं रूपोपन्यासः' इत्युक्तम् । तदभिप्रायेणेहोपनिषद्विवरणेऽपि—विराट्पुरुषः स एव । तत्त्वान्तरितत्वेन लक्ष्यमाणोऽपि एतस्मादेव जायत इत्युक्तम् ।
परिमलकारास्तु—'अग्निर्मूर्धे'त्यादिना उक्तं सर्वप्रपञ्चात्मकं रूपं परमेश्वर एव समञ्जसं सर्वोपादानत्वेन सर्वात्मकत्वात् । न तु हिरण्यगर्भे । सगुणे सम्भवतस्तस्य निर्गुणेऽपि स्तुत्यर्थमुपन्यासात् । इदमेव च स्वमतमित्याहुः । अत एव स्मर्यमाणमनुमानं स्यादिति सूत्रमस्य मन्त्रस्य परमात्मपरत्वं सूचयति । तस्मादग्निः द्युलोकः ।

२. प्रजावस्थानविशेषः—देवानां निवासभूतः स्वर्गः ।

तस्माद्दचः साम [1]यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च ।
संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः ॥ ६ ॥

तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयांसि ।
प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥ ७ ॥

५ **ततो हि द्युलोका**[2]**न्निष्पन्नात्सोमात्पर्जन्यो द्वितीयोऽग्निः सम्भवति । तस्माच्च पर्जन्यादोषधयः पृथिव्यां सम्भवन्ति । ओषधिभ्यः पुरुषाग्नौ हुताभ्य उपादानभूताभ्यः पुमानग्नौ रेतः सिञ्चति योषितायां योषिति यौषाग्नौ स्त्रियामिति । एवं क्रमेण बह्वीर्बह्वयः ब्राह्मणाद्याः पुरुषात्परस्मात्संप्रसूताः समुत्पन्नाः ॥ ५ ॥**

किञ्च कर्मसाधनानि फलानि च तस्मादेवेत्याह—कथं? तस्मात्पुरुषादृचो नियताक्षरपादावसाना गायत्र्यादिच्छन्दोविशिष्टा मन्त्राः । साम पाञ्चभक्तिकं साप्तभक्तिकं च स्तोभादि गीतविशिष्टम् । यजूंष्यनियताक्षरपादावसानानि
१० वाक्यरूपाण्येवं त्रिविधा मन्त्राः । [3]दीक्षाः मौञ्ज्यादिलक्षणाः कर्तृनियमविशेषाः । यज्ञाश्च सर्वेऽग्निहोत्रादयः । क्रतवः [4]सयूपाः । दक्षिणाश्चैकगवाद्यपरिमितसर्वस्वान्ताः । संवत्सरश्च कालः कर्माङ्गम् । यजमानश्च कर्ता । लोकास्तस्य कर्मफलभूताः । ते विशेष्यन्ते सोमो यत्र येषु लोकेषु पवते पुनाति लोकान्यत्र येषु सूर्यस्तपति च, ते च दक्षिणायनोत्तरायणमार्गद्वयगम्या विद्वदविद्वत्कर्तृफलभूताः ॥ ६ ॥

तस्माच्च पुरुषात्कर्माङ्गभूता देवाः बहुधा वस्वादिगणभेदेन संप्रसूताः सम्यक्प्रसूताः । साध्या देवविशेषाः ।
१५ मनुष्याः कर्माधिकृताः । पशवो ग्राम्यारण्याः । वयांसि पक्षिणः । जीवनं च मनुष्यादीनाम् प्राणापानौ, व्रीहियवौ हविरर्थौ । तपश्च कर्माङ्गं पुरुषसंस्कारलक्षणं स्वतन्त्रं च फलसाधनम् । श्रद्धा यत्पूर्वकः सर्वपुरुषार्थसाधनप्रयोगश्चित्तप्रसाद आस्तिक्यबुद्धिः, तथा सत्यमनृतवर्जनं यथाभूतार्थवचनं चापीडाकरम् । ब्रह्मचर्यं मैथुनासमाचारः । विधिश्चेतिकर्तव्यता[5] ॥ ७ ॥

पाञ्चभक्तिकमिति । हिङ्कारप्रस्तावोद्गीथप्रतिहारनिधनाख्याः पञ्च भक्तयोऽवयवा यस्य तत्तथोक्तम् ।
२० **साप्तभक्तिकमिति** । हिङ्कारप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः सप्त भक्तयो यस्य तत्तथोक्तम् । स्तोभोऽर्थशून्यो वर्णः । विश्वजित्सर्वमेधयोः सर्वस्वदक्षिणा । अत एकां गामारभ्य सर्वस्वान्ता दक्षिणा भवन्तीत्यर्थः ॥ ६ ॥

तपश्च कर्माङ्गमिति । [6]पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्याऽऽमिक्षा वैश्यस्येत्यादिविहितम् [स्वतन्त्रं] कृच्छ्रचान्द्रायणादीत्यर्थः ॥ ७ ॥

---

१. यजूंषि—"एक वाक्यं एकं यजुः" इति तल्लक्षणम् । वाक्यत्वं च एकमुख्यविशेष्यकबोधजनकत्वे सति
२५ विभज्यमाने साकाङ्क्षत्वम् । (पू० मी० २-१-१४)

२. निष्पन्नात् सोमात्—पञ्चाग्निद्वारेण संसरतां प्रथमाग्निः द्युलोकः तत्र कर्मिणः आहुतिद्वारा गत्वा सोमरूपेण निष्पद्यन्ते 'एष सोमो राजा तद्देवानामन्नमि'त्युक्तेः ।

३. दीक्षा—यमनियमादिपरिग्रहानुकूलयोग्यता, तदभिव्यञ्जकं च मौञ्जीदण्डकृष्णाजिनादिः ।

४. सयूपाः—पशुयागाः तदङ्गकाः सोमयागाश्च । तत्र पशुनियोजनार्थो यूपः खादिरादिः । दक्षिणाः प्रायः
३० गौरेव दक्षिणा । तत्रापि क्वचिदेका गौर्दक्षिणा । विकृतिविशेषे धेनुर्दक्षिणा । ज्योतिष्टोमे तु द्वादशशतं गावः । आधाने एका देया, षड्देयाः शतं देयं, सहस्रं देयं, अपरिमितं देयमित्युक्तम् ।

५. इतिकर्तव्यता—अङ्गकलापः ।

६. पयोव्रतम्—क्षुन्निवृत्तिसाधनम् । आमिक्षा—तप्तपयसि दधिप्रक्षेपे सम्पद्यमानं कठिनद्रव्यम् । कृच्छ्रम्—
त्र्यहमहनि भोजनं त्र्यहं रात्रौ त्र्यहमयाचितं, त्र्यहमुपवासः । एवंकृते प्राजापत्यकृच्छ्रमनुष्ठितं भवति ।
३५ चान्द्रायणम्—शुक्लप्रतिपदि एकः कवलो भोक्तव्यः । प्रत्यहं तद्वर्धने पौर्णमास्यां पञ्चदशकवलाः । ततः प्रतिपदि चतुर्दश इति क्रमेण ह्रासः अमावास्यामेकः । इदं यवमध्यचान्द्रायणम् ।

सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषः समिधः सप्त होमाः ।
सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त ॥ ८ ॥
अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः ।
अतश्च सर्वा ओषधयो रसश्च येनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥ ९ ॥
पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् । ५
एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ॥ १० ॥

इत्यथर्ववेदीयमुण्डकोपनिषदि द्वितीयमुण्डके प्रथमः खण्डः

किञ्च सप्त [1]शीर्षण्याः प्राणास्तस्मादेव पुरुषात्प्रभवन्ति । तेषां च सप्तार्चिषो दीप्तयः स्वविषयावद्योतनानि । तथा सप्त समिधः सप्त विषयाः । विषयैर्हि समिध्यन्ते प्राणाः । सप्त होमास्तद्विषयविज्ञानानि "यदस्य विज्ञानं तज्जुहोति" इति श्रुत्यन्तरात् । किञ्च सप्तेमे लोका इन्द्रियस्थानानि येषु चरन्ति सञ्चरन्ति प्राणाः । प्राणा येषु १०
चरन्तीति प्राणानां विशेषणमिदं प्राणापानादिनिवृत्त्यर्थम् । गुहायां शरीरे हृदये वा स्वापकाले शेरत इति गुहाशयाः । निहिताः स्थापिता धात्रा सप्त सप्त प्रतिप्राणिभेदम् । यानि चाऽऽत्मयाजिनां[2] विदुषां कर्माणि कर्मफलानि चाविदुषां च कर्माणि तत्साधनानि कर्मफलानि च सर्वं चैतत्परस्मादेव पुरुषात्सर्वज्ञात्प्रसूतमिति प्रकरणार्थः ॥ ८ ॥

अतः पुरुषात्समुद्राः सर्वे क्षाराद्याः । गिरयश्च हिमवदादयोऽस्मादेव पुरुषात्सर्वे । स्यन्दन्ते स्रवन्ति गङ्गाद्याः सिन्धवो नद्यः सर्वरूपा बहुरूपाः । अस्मादेव सर्वा ओषधयो व्रीहियवाद्याः । रसश्च मधुरादिः षड्विधो येन रसेन भूतैः १५
पञ्चभिः स्थूलैः परिवेष्टितस्तिष्ठते तिष्ठति ह्यन्तरात्मा लिङ्गं सूक्ष्मं शरीरम् । तद्धचन्तराले शरीरस्याऽऽत्मनश्चाऽऽत्मवद्वर्तत इत्यन्तरात्मा ॥ ९ ॥

एवं पुरुषात्सर्वमिदं संप्रसूतम् । अतो वाचारम्भणं विकारो नामधेयमनृतं [3]पुरुष इत्येव सत्यम् । अतः पुरुष एवेदं विश्वं सर्वम् । न विश्वं नाम पुरुषादन्यत्किञ्चिदस्ति । अतो यदुक्तं तदेतदभिहितं कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति । एतस्मिन्हि परस्मिन्नात्मनि सर्वकारणे पुरुषे विज्ञाते [4]पुरुष एवेदं विश्वं नान्यदस्तीति २०

आत्मयाजिनामिति । सकलमिदमहं च परमात्मैवेतिभावनापूर्वकं परमेश्वराराधनबुद्ध्या ये यजन्ति तेषामित्यर्थः ॥ ८ ॥

---

१. शिरसि भवाः द्वे चक्षुषी द्वे श्रोत्रे द्वे नासिके एका वाक् इति सप्त । अवद्योतनं विषयप्रकाशः वृत्तिफलितचैतन्यकृतः होमस्तु वृत्तिः ।

२. अन्तःकरणशुद्ध्यर्थं ये यजन्ति ते आत्मयाजिनः । तदुक्तम्—'आत्मयाजी तु करोति इदमनेनाङ्गं २५
संस्क्रियत' इति ।

३. एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय छान्दोग्यषष्ठे 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयमि'त्यनेन विकारस्यानृतत्वात्, 'उपादानमेव विकाराणां तत्त्वमि'त्यवगमात् सर्वप्रपञ्चोपादानब्रह्मज्ञानात् सर्वोऽपि प्रपञ्चः तत्त्वतोऽवगतो भवतीति व्युत्पादितम् । अत्र तु 'पुरुष एवेदं सर्वमि'ति पुरुषस्य सर्वात्मकत्वोपपादनेन बाधायां समानाधिकरण्यात् पुरुषव्यति- ३०
रेकेण सर्वं स्वरूपेण नास्ति 'पुरुष एव तत्त्वं सर्वस्ये'त्युक्तेः पुरुषविज्ञानेन सर्वस्य तत्त्वतो विज्ञानोपपादनं संक्षेपेण कृतम् । न तु छान्दोग्य इव विस्तरेण । इयमेव रीतिः बृहदारण्यके 'आत्मनि विज्ञाते सर्वं विज्ञातं भवती'ति प्रतिज्ञाय 'इदं सर्वं यदयमात्मा' इति पुरुषस्य सर्वात्मकत्वमुक्तम् । गीतासु च 'यज्ज्ञात्वा नेह भूयोऽन्यत् ज्ञातव्यमवशिष्यते' इत्युक्त्वा 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा' इति भगवतः उपादानकारणत्वमुक्तम् । तत्रापीयमेव रीतिः । ३५

४. पुरुष एवेदं विश्वमिति मतान्तरे न सम्भवति, जीवानामनादित्वेन पुरुषोपादानकत्वाभावात्, अभेदानङ्गीकाराच्च ।

आविः संनिहितं गुहाचरं नाम महत्पदमत्रैतत्समर्पितम् ।
एजत्प्राणन्निमिषच्च यदेतज्जानथ सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानाम् ॥ १ ॥
यदर्चिमद्यदणुभ्योऽणु च यस्मिँल्लोका निहिता लोकिनश्च ।
तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः । तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि ॥ २ ॥

विज्ञातं भवतीति । किं पुनरिदं विश्वमित्युच्यते । कर्माग्निहोत्रादिलक्षणम् । तपो ज्ञानं तत्कृतं फलमन्यदेतावद्धीदं सर्वम् । तच्चैतद्ब्रह्मणः कार्यं तस्मात्सर्वं ब्रह्म परामृतं परममृतमहमेवेति यो वेद निहितं स्थितं गुहायां हृदि सर्वप्राणिनां स एवं विज्ञानादविद्याग्रन्थिं ग्रन्थिमिव दृढीभूतामविद्यावासनां विकिरति विक्षिपति नाशयतीह जीवन्नेव न मृतः सन्हे सोम्य प्रियदर्शन ॥ १० ॥

इत्यथर्ववेदीयमुण्डकोपनिषद्भाष्ये द्वितीयमुण्डके प्रथमः खण्डः

अरूपं सदक्षरं केन प्रकारेण विज्ञेयमित्युच्यते—**आविः प्रकाशं सन्निहितं वागाद्युपाधिभि"र्ज्वलति भ्राजती"ति श्रुत्यन्तराच्छब्दादीनुपलभमानवदवभासते । दर्शनश्रवणमननविज्ञानाद्युपाधिधर्मैराविर्भूतं सल्लक्ष्यते हृदि सर्वप्राणिनाम् । यदेतदाविर्ब्रह्म सन्निहितं सम्यक्स्थितं हृदि तद्गुहाचरं नाम गुहायां चरतीति दर्शनश्रवणादिप्रकारैर्गुहाचरमिति प्रख्यातम् । महत्सर्वमहत्त्वात्पदं पद्यते सर्वेणेति सर्वपदार्थस्पदत्वात् । कथं तन्महत्पदमित्युच्यते । यतोऽत्रास्मिन्ब्रह्मण्येतत्सर्वं समर्पितं प्रवेशितं रथनाभाविवाराः—एजच्चलत्पक्ष्यादि । प्राणत्प्राणितीति प्राणापानादिमन्मनुष्यपश्वादि । निमिषच्च यन्निमेषादिक्रियावद्यच्चानिमिषत् चशब्दात्समस्तमेतदत्रैव ब्रह्मणि समर्पितम् । एतद्यदास्पदं सर्वं जानथ हे शिष्या अवगच्छथ तदात्मभूतं भवतां सदसत्स्वरूपम् । सदसतोर्मूर्तामूर्तयोः स्थूलसूक्ष्मयोस्तद्व्यतिरेकेणाभावात् । वरेण्यं वरणीयं तदेव हि सर्वस्य नित्यत्वात्प्रार्थनीयं परं व्यतिरिक्तं विज्ञानात्प्रजानामिति व्यवहितेन सम्बन्धो यल्लौकिकविज्ञानागोचरमित्यर्थः । यद्वरिष्ठं वरतमं सर्वपदार्थेषु वरेषु तद्धचेकं ब्रह्मातिशयेन वरं सर्वदोषरहितत्वात् ॥ १ ॥**

किञ्च—यदर्चिमद्दीप्तिमत् यद्दीप्त्याऽऽदित्यादि दीप्यत इति दीप्तिमद्ब्रह्म । किञ्च यदणुभ्यः श्यामाकादिभ्योऽप्यणु

यत्पृष्टं कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति तन्निरूपितम् । सर्वमिदं परमात्मनो जायते । अतस्तावन्मात्रं सर्वं तस्मिन्विज्ञाते विज्ञातं भवतीत्यविद्याक्षयफलाभिधानेनोपसंहृतमिति ॥ ९-१० ॥

इति मुण्डकोपनिषद्भाष्यटीकायां द्वितीयमुण्डके प्रथमः खण्डः ।

अधुना यस्य सकृदुपदेशमात्रेणाद्वितीयं ब्रह्मास्मीतिवाक्यार्थज्ञानं न भवति तस्योपायानुष्ठानेन भवितव्यमित्यभिप्रेत्याऽऽह—**अरूपं सदक्षरमिति ।** वाक्यार्थस्यैव पुनः पुनर्भावना युक्त्यनुसन्धानं चोपाय इत्याह—**उच्यत इति ।** आविःशब्दो निपातः प्रकाशवाची । ब्रह्म विश्वोपलब्ध्यात्मना प्रकाशमानमेव सदेति भावयेदित्यर्थः । अन्यैरप्युक्तम्—

"यदस्ति यद्भाति तदात्मरूपं नान्यत्ततो भाति न चान्यदस्ति ।
स्वभावसंवित्प्रतिभाति केवलं ग्राह्यं ग्रहीतेति मृषैव कल्पना ॥" इति ।

सन्निहितमिति । सर्वेषां प्राणिनां हृदये स्थितं वागाद्युपाधिभिः शब्दादीनुपलभमानवद्ब्रह्मैव जीवभावमापन्नमवभासते । ततः स्वतोऽपरोक्षं चेति सदा स्मरेदित्यर्थः । सर्वमिदं कार्यं परिच्छिन्नं च सास्पदं कार्यत्वात्परिच्छिन्नत्वाच्च घटादिवत्ततः सर्वास्पदं यत्तदेव मायास्पदमात्मभूतमिति युक्त्यनुसन्धानमाह—**महत्पदमिति ॥ १ ॥**

घटादिवदादित्यादेर्जडत्वेऽपि यद्दीप्तिमत्त्वं वैचित्र्यं तदनुपपत्त्याऽपि तत्कारणं सम्भावनीयमित्याह—**किञ्च यदर्चिमदिति ।** अर्चिमत्त्वादादित्यादिवदिन्द्रियग्राह्यत्वं प्राप्तं निषेधयति—**यदणुभ्य इति ।** परमाणुपरिमाणत्वं तर्हि

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धयीत ।
आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥ ३ ॥
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ४ ॥
[1]यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुः ॥ ५ ॥ ५

च सूक्ष्मम् । चशब्दात्स्थूलेभ्योऽप्यतिशयेन स्थूलं पृथिव्यादिभ्यः । यस्मिँल्लोका भूरादयो निहिताः स्थिताः । ये च लोकिनो लोकनिवासिनो मनुष्यादयः, चैतन्याश्रया हि सर्वे प्रसिद्धास्तदेतत्सर्वाश्रयमक्षरं ब्रह्म स प्राणस्तदु वाङ्मनो वाक्च मनश्च सर्वाणि च करणानि तदु अन्तश्चैतन्यं; चैतन्याश्रयो हि प्राणेन्द्रियादिसर्वसङ्घातः "प्राणस्य प्राणम्" इति श्रुत्यन्तरात् । यत्प्राणादीनामन्तश्चैतन्यमक्षरं तदेतत्सत्यमवितथमतोऽमृतमविनाशि तद्वेद्धव्यं मनसा ताडयितव्यम् । तस्मिन्मनःसमाधानं कर्तव्यमित्यर्थः । यस्मादेवं हे सोम्य विद्धयक्षरे चेतः समाधत्स्व ॥ २ ॥ १०

कथं वेद्धव्यमित्युच्यते—धनुरिष्वासनं गृहीत्वाऽऽदायौपनिषदमुपनिषत्सु भवं प्रसिद्धं महास्त्रं महच्च तदस्त्रं च महास्त्रं धनुस्तस्मिञ्शरम् । किंविशिष्टमित्याह—उपासानिशितं सन्ततामिध्यानेन तनूकृतं संस्कृतमित्येतत् । सन्धयीत सन्धानं कुर्यात् । सन्धाय चाऽऽयम्याऽऽकृष्य सेन्द्रियमन्तःकरणं स्वविषयाद्विनिवर्त्य लक्ष्य एवाऽऽर्वाजितं कृत्वेत्यर्थः। न हि हस्तेनेव धनुष आयमनमिह सम्भवति। तद्भावगतेन तस्मिन्ब्रह्मण्यक्षरे लक्ष्ये भावना भावस्तद्गतेन चेतसा लक्ष्यं तदेव यथोक्तलक्षणमक्षरं सोम्य विद्धि ॥ ३ ॥ १५

यदुक्तं धनुरादि तदुच्यते—प्रणव ओङ्कारो धनुः। यथेष्वासनं लक्ष्ये शरस्य प्रवेशकारणं तथाऽऽत्मशरस्याक्षरे लक्ष्ये प्रवेशकारणमोङ्कारः । प्रणवेन ह्याभ्यस्यमानेन संस्क्रियमाणस्तदालम्बनोऽप्रतिबन्धेनाक्षरेऽवतिष्ठते यथा धनुषाऽऽस्त इषुर्लक्ष्ये । अतः प्रणवो धनुरिव धनुः । शरो ह्यात्मोपाधिलक्षणः पर एव जले सूर्यादिवदिह प्रविष्टो देहे सर्वबौद्धप्रत्ययसाक्षितया स शर इव स्वात्मन्येवार्पितोऽक्षरे ब्रह्मण्यतो ब्रह्म तल्लक्ष्यमुच्यते लक्ष्य इव मनःसमाधित्सुभिरात्मभावेन लक्ष्यमाणत्वात् । तत्रैवं सत्यप्रमत्तेन बाह्यविषयोपलब्धितृष्णाप्रमादवर्जितेन सर्वतो विरक्तेन २० जितेन्द्रियेणैकाग्रचित्तेन वेद्धव्यं ब्रह्म लक्ष्यम् । ततस्तद्वेधनादूर्ध्वं शरवत्तन्मयो भवेत् । यथा शरस्य लक्ष्यैकात्मत्वं फलं भवति तथा देहाद्यात्मप्रत्ययतिरस्करणेनाक्षरैकात्मत्वं फलमापादयेदित्यर्थः ॥ ४ ॥

अक्षरस्यैव दुर्लक्ष्यत्वात्पुनः पुनर्वचनं सुलक्षणार्थम्—यस्मिन्नक्षरे पुरुषे द्यौः पृथिवी चान्तरिक्षं चोतं समर्पितं मनश्च सह प्राणैः करणैरन्यैः सर्वैस्तमेव सर्वाश्रयमेकमद्वितीयं जानथ जानीथ हे शिष्याः । आत्मानं प्रत्यक्स्वरूपं युष्माकं सर्वप्राणिनां च ज्ञात्वा चान्या वाचोऽपरविद्यारूपा विमुञ्चथ विमुञ्चत परित्यजत । तत्प्रकाश्यं च सर्वं कर्म २५

स्यादिति नाऽऽशङ्कनीयमित्याह—**चशब्दादिति**। स्थूलत्वात्तर्ह्यन्याधारं[2] स्यादिति नाऽऽशङ्कनीयमित्याह—**यस्मिँल्लोका इति** । प्राणादिप्रवृत्तिश्चेतनाधिष्ठाननिबन्धना जडप्रवृत्तित्वाद्रथादिप्रवृत्तिवच्चेद्भेदे च प्रमाणाभावादेकचैतन्यमात्रमस्मीति विचारयेदित्याह—**तदेतत्सर्वाश्रयमिति** । प्राणाद्यधिष्ठानत्वात्प्राणादिलक्ष्य आत्मा द्रष्टव्यः ॥ २ ॥

विचारासमर्थस्य प्रणवमवलम्ब्य ब्रह्मात्मैकत्वे चित्तसमाधानं क्रममुक्तिफलं दर्शयितुमुपक्रमते—**कथं वेद्धव्यमित्यादिना** । प्रणवो ब्रह्मेत्यभिध्यायत उपसंहृतकरणग्रामस्य प्रणवोपरक्तं यच्चैतन्यप्रतिबिम्बं स्फुरति स ३० आत्मेत्यनुसन्धानं प्रणवे शरसन्धानं तस्य चित्प्रतिबिम्बस्य बिम्बैक्यानुसन्धानं लक्ष्यवेधः ॥ ३-४ ॥

उत्तरग्रन्थस्य पौनरुक्त्यं परिहरति—**अक्षरस्यैव दुर्लक्ष्यत्वादिति** । ससाधनं सर्वं कर्म परित्यज्याऽऽत्मैव

---

१. अत्र द्युपृथिव्यादीनामाधारत्वेन श्रूयमाणं वस्तु प्रधानं वा हिरण्यगर्भरूपो वायुर्वा ब्रह्म वेति सन्दिह्य प्रधानं वायुर्वा इदं भवितुमर्हति प्रपञ्चाश्रयत्वस्य तयोरपि सम्भवात् इति पूर्वपक्षं कृत्वा सिद्धान्तितं 'द्युभ्वाद्यायतनं स्वशब्दाद्' ब्रह्मेति 'तत्तु समन्वयादि'त्यतः अनुवर्तते, स्वशब्दात्–आत्मशब्दात् तमात्मानमित्युक्तेः। ३५ तस्यैव वाग्विमोकपूर्वकज्ञेयत्वस्य "नानुध्यायाद्बहून् शब्दान्" इत्यादौ बृहदारण्यके श्रुतत्वात् ।

२. अन्याधारम्—अन्यः आधारो यस्य, अन्यत्र निहितमित्यर्थः। सर्वलोकाधारत्वादनाधारमिति समाधानम् ।

अरा इव रथनाभौ संहता यत्र नाडयः । स एषोऽन्तश्चरते बहुधा जायमानः ।
ओमित्येवं ध्यायथ आत्मानं [1]स्वस्ति वः पाराय तमसः परस्तात् ॥ ६ ॥
यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः ।
[2]मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय ।
तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥ ७ ॥

सत्साधनम् । यतोऽमृतस्यैष सेतुरेतदात्मज्ञानममृतस्यामृतत्वस्य मोक्षस्य प्राप्तये सेतुरिव सेतुः संसारमहोदधेरुत्तरणहेतुत्वात्तथा च श्रुत्यन्तरम्—"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति ॥ ५ ॥

किञ्च—अरा इव । यथा रथनाभौ समर्पिता अरा एवं संहताः सम्प्रविष्टा यत्र यस्मिन्हृदये सर्वतो देहव्यापिन्यो नाड्यस्तस्मिन्हृदये बुद्धिप्रत्ययसाक्षिभूतः स एष प्रकृत आत्माऽन्तर्मध्ये चरते चरति वर्तते । पश्यञ्शृण्वन्मन्वानो विजानन्बहुधाऽनेकधा क्रोधहर्षादिप्रत्ययैर्जायमान इव जायमानोऽन्तःकरणोपाध्यनुविधायित्वात् । वदन्ति लौकिका 'हृष्टो जातः क्रुद्धो जात' इति । तमात्मानमोमित्येवमोङ्कारालम्बनाः सन्तो यथोक्तकल्पनया ध्यायथ चिन्तयत । उक्तं च वक्तव्यं शिष्येभ्य आचार्येण जानता । शिष्याश्च ब्रह्मविद्याविविदिषुत्वान्निवृत्तकर्माणो मोक्षपथे प्रवृत्ताः । तेषां निर्विघ्नतया ब्रह्मप्राप्तिमाशास्त्याचार्यः । स्वस्ति निर्विघ्नमस्तु वो युष्माकं पाराय परकूलाय । परस्तात् कस्मात् ? अविद्यातमसः । अविद्यारहितब्रह्मात्मस्वरूपगमनायेत्यर्थः ॥ ६ ॥

योऽसौ तमसः परस्तात्संसारमहोदधिं तीर्त्वा गन्तव्यः परविद्याविषय इति स कस्मिन्वर्तत इत्याह—यः सर्वज्ञः सर्वविद्याख्यातः । तं पुनर्विशिनष्टि । यस्यैष प्रसिद्धो महिमा विभूतिः । [3]कोऽसौ महिमा ? यस्येमे द्यावापृथिव्यौ शासने विधृते तिष्ठतः । सूर्याचन्द्रमसौ यस्य शासनेऽलातचक्रवदजस्रं भ्रमतः । यस्य शासने सरितः सागराश्च स्वगोचरं नातिक्रामन्ति । तथा स्थावरं जङ्गमं च यस्य शासने नियतम् । तथा चर्तवोऽयने अब्दाश्च यस्य शासनं नातिक्रामन्ति ।

ज्ञातव्य इत्यत्रैव हेतुमाह—**अमृतस्येति** । धनुषाऽऽयुधेन लक्ष्यत इति तल्लक्षण आत्मैकत्वसाक्षात्कार इत्यर्थः ॥ ५ ॥

कर्मसङ्गिजनसङ्गत्या कर्मश्रद्धा विषयश्रद्धा च वाक्यार्थज्ञानस्यावगमाय प्रतिबन्धको विघ्नः स मा भूदित्याशंसनम् । न तु वाक्यार्थावगतौ निष्पन्नायां फलप्राप्तेर्विघ्नशङ्काऽस्तीत्यभिप्रेत्याऽऽह—**परस्तादिति** । मदुपदेशादूर्ध्वमित्यर्थः ॥ ६ ॥

सर्वेश्वरत्वमनोमयत्वादिगुणविशिष्टब्रह्मणो हृदयपुण्डरीके ध्यानं च क्रममुक्तिफलं मन्दब्रह्मविदो विधीयत इति दर्शयितुमाह—**योऽसौ तमसः परस्तादित्यादिना** ॥ ७ ॥

---

१. अत्राचार्यः शिष्याननुगृह्णाति । एवमेव मुण्डकब्राह्मणे प्रश्नोपनिषदि "तं वेद्यं पुरुषं वेद मा वो मृत्युः परिव्यथा इति" इति वाक्येन शिष्यान् गृहीतब्रह्मविद्यान् अनुगृह्णाति ।

२. मनोमय इत्यादिवाक्यं जीवपरम् । तस्यैव प्राणभृत्त्वेन प्राणशरीरत्वस्योपपत्तेः प्राणशरीरयोः शरीरान्तरं प्रति नेतृत्वोपपत्तेश्च । मतान्तरे तु प्राणशरीरः नेता इति पृथग्विशेषणत्वमुक्तं परमात्मनः । मनोमयत्वादिकं जीवे प्रसिद्धतरम् । स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय इत्यादौ ।

३. कोऽसौ महिमेति प्रश्नपूर्वकमाचार्यः बृहदारण्यके अक्षरब्राह्मणे याज्ञवल्क्येनानुक्रान्तान् महिम्न आह—"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत" इत्यादीन् सर्वासामुपनिषदामैककण्ठ्यस्फोरणाय ।

क्षीयन्ते चास्य कर्माणीति । न च "स आगच्छति विरजां नदीं तत्सुकृतदुष्कृते विधूनुते" (कौ० १-४) इति श्रुतिविरोधः ज्ञानबलात् भवन् दुरितक्षयः यदैव ज्ञानं तदैव भवति, न तु मृत्वा विरजानदीगमनं यावदवतिष्ठते हेत्वभावात्, विरजातटे सुकृतदुष्कृतक्षयस्य प्रायश्चित्तादिकारणाभावाच्च । तदुक्तम्—साम्पराये तर्तव्याभावात्तथाह्यन्ये (ब्र० सू० ३-३-२७)—इति सञ्चितदुरितनाशेऽपि प्रारब्धानुवृत्तिः, मुक्तेषुन्यायेन, प्रारब्धस्य ज्ञानोपजीव्यत्वाच्च ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ८ ॥

तथा कर्तारः कर्माणि फलं च यच्छासनात्स्वं स्वं कालं नातिवर्तन्ते स एष महिमा । भुवि लोके यस्य स एष सर्वज्ञ एवंमहिमा देवः । दिव्ये द्योतनवति सर्वबौद्धप्रत्ययकृतद्योतने ब्रह्मपुरे । ब्रह्मणोऽत्र चैतन्यस्वरूपेण नित्याभिव्यक्तत्वाद्-ब्रह्मणः पुरं हृदयपुण्डरीकं तस्मिन्यद्योम तस्मिन्व्योम्न्याकाशे हृत्पुण्डरीकमध्यस्थे प्रतिष्ठित इवोपलभ्यते । न ह्याकाशवत्सर्वगतस्य गतिरागतिः प्रतिष्ठा वाऽन्यथा सम्भवति । स ह्यात्मा तत्रस्थो मनोवृत्तिभिरेव विभाव्यत इति मनोमयो मनउपाधित्वात् प्राणशरीरनेता प्राणश्च शरीरं[1] च प्राणशरीरं तस्यायं नेता स्थूलाच्छरीराच्छरीरान्तरं प्रति । प्रतिष्ठितोऽवस्थितोऽन्ने भुज्यमानान्नविपरिणामे प्रतिदिनमुपचीयमानेऽपचीयमाने च पिण्डरूपान्ने । हृदयं बुद्धि पुण्डरीकच्छिद्रे सन्निधाय समवस्थाप्य । हृदयावस्थानमेव ह्यात्मनः स्थितिर्न ह्यात्मनः स्थितिरन्ने । तदात्मतत्त्वं विज्ञानेन विशिष्टेन शास्त्राचार्योपदेशजनितेन ज्ञानेन शमदमध्यानसर्वत्यागवैराग्योद्भूतेन परिपश्यन्ति सर्वतः पूर्णं पश्यन्त्युपलभन्ते धीरा विवेकिनः । आनन्दरूपं सर्वानर्थदुःखायासप्रहीणममृतं यद्विभाति विशेषेण स्वात्मन्येव भाति सर्वदा ॥७॥

अस्य परमात्मज्ञानस्य फलमिदमभिधीयते—**भिद्यते हृदयग्रन्थिरविद्यावासनाप्रचयो बुद्ध्याश्रयः कामः** "कामा येऽस्य हृदि श्रिताः" इति श्रुत्यन्तरात् । हृदयाश्रयोऽसौ नाऽऽत्माश्रयः । **भिद्यते भेदं विनाशमायाति । छिद्यन्ते सर्वज्ञेयविषयाः संशया लौकिकानामामरणात्तु गङ्गास्रोतोवत्प्रवृत्ता विच्छेदमायान्ति । अस्य विच्छिन्नसंशयस्य निवृत्ताविद्यस्य यानि विज्ञानोत्पत्तेः प्राक्तनानि जन्मान्तरे चाप्रवृत्तफलानि ज्ञानोत्पत्तिसहभावीनि च क्षीयन्ते कर्माणि । न त्वेतज्जन्मारम्भकाणि प्रवृत्तफलत्वात्तस्मिन्सर्वज्ञेऽसंसारिणि परावरे परं च कारणात्मनाऽवरं च कार्यात्मना तस्मिन्परावरे साक्षादहमस्मीति दृष्टे संसारकारणोच्छेदान्मुच्यत इत्यर्थः ॥ ८ ॥**

अस्य परमात्मज्ञानस्येति । जीवन्मुक्तिफलस्याद्वैतवाक्यार्थावगमस्य क्रममुक्तिफलस्य चोपासनस्येत्यर्थः । अविद्यावासनाप्रचयो भिद्यत इति कोऽर्थः । किं बुद्धौ विद्यमानायामविद्यादिभेदो ज्ञानफलं किंवा तन्निवृत्तौ । नाऽऽद्यः । सत्युपादाने कार्यस्यात्यन्तोच्छेदासम्भवात् । न द्वितीयः । ज्ञानस्याज्ञानेनैव साक्षाद्विरोधप्रसिद्धेः । किञ्च । बुद्धिरप्यनादिः सादिर्वा । नाऽऽद्यः "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इतिश्रुतिविरोधात् । नान्त्यः । प्रलये ब्रह्मज्ञानं विनैव बुद्धेर्नाशसम्भवात्तदानर्थक्यप्रसङ्गात् । सादित्वे च बुद्धेरुपादानं साक्षाद्ब्रह्म चेत्तन्नाशं विनाऽत्यन्तोच्छेदो न स्यात् । माया चेत्सा द्रष्टृगतज्ञानेन नोच्छेदमर्हति । लौकिकमायाविगतमायाया द्रष्टृगतज्ञानेनोच्छेदादर्शनात् । किञ्च । बुद्धेरुच्छेदो न तस्याः फलं स्वनाशस्याफलत्वात् । नाऽऽत्मनः । तस्य बुद्धिप्रसङ्गाभावेन तदुच्छेदस्याफलत्वात् । किञ्चाऽऽत्मनोऽविद्याद्यनाश्रयत्वाभिधानं श्रुतिविरुद्धं प्रक्रमे—अविद्यायामन्तरे वर्तमाना इति श्रवणादुपसंहारे च—"अनीशया शोचति मुह्यमानः" इति श्रवणात् । बुद्धिगतमेवाविद्याद्यात्मन्यध्यस्यत इति चेदध्यस्यत इति कोऽर्थः । निक्षिप्यते भ्रान्त्या दृश्यते वा । नाऽऽद्यः । अन्यधर्मस्यान्यत्र निक्षेपासम्भवात् । भ्रान्त्या चेत्केन दृश्यते । न तावदात्मना तस्याविद्याश्रयत्वानङ्गीकारात् । न बुद्ध्या । बुद्धेरात्मविषयत्वासम्भवेन तद्गतदर्शनासम्भवात् । तद्भ्रान्तेश्च स्वाश्रयगतेन तत्त्वानुभवेन निवर्त्यत्वप्रसिद्धेर्बुद्धेरनुभवाश्रयत्वप्रसङ्गात् । तस्मान्नास्य भाष्यस्य सम्यगर्थं पश्याम इति चेत्, **उच्यते**। चित्तन्नाऽऽदिरनिर्वाच्याऽविद्या चैतन्यमवच्छिद्य स्वावच्छिन्नचैतन्यस्य बुद्ध्यादितादात्म्यरूपेण विवर्तते । तस्याश्च ब्रह्मात्मतासाक्षात्कारनिवर्त्यरूपाङ्गीकारात्तन्निवृत्तौ तदुत्थहृदयग्रन्थिभेदः श्रुत्योच्यते । भाष्यकारीयं च बुद्ध्याश्रयत्वाभिधानमहङ्कारविशेषणत्वेनाविद्यादेर्व्यावहारिकत्वाभिप्रायेण, आत्मानाश्रयत्वाभिधानं चाऽऽत्मनो निर्विकारत्वाभिप्रायम् । [2]बाधितानुवृत्तिश्च प्रकटार्थे प्रादर्शीति जीवन्मुक्तिर्न विरुध्यते ॥ ८ ॥

---

१. शरीरं—लिङ्गशरीरम् ।

२. तत्र हि एवमुक्तम्—अवश्यं तावत् स्वोत्पत्तये तत्त्वज्ञानेन प्रवृत्तफलं कर्माश्रयणीयम् । स्वीकृते तस्मिन् कर्मणि कुलालचक्रवत् प्रवृत्तवेगस्य तन्निवर्तनपाटवशून्यत्वेन मध्ये क्षयासम्भवात् भवति वेगक्षयप्रतिपालनम् । उद्दालकादीनां तत्त्वदर्शिनामेव शरीरधारणविषयश्रुतिस्मृतिलिङ्गैः तत्त्वदर्शिभिरेव गुरुशिष्यसम्बन्धनिर्देशान्यथानुपपत्त्या चानुगृहीतात् तस्य तावदेव चिरमिति लिङ्गात् गम्यत इति । यत्त भास्करोक्तम्—आश्रयाभावान्न कर्मानुवृत्तिः जीवस्य ब्रह्मीभावात् ब्रह्मणश्च तदसम्बन्धात् । जीवन्

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥ ९ ॥
[1]न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥१०॥
ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥११॥

इत्यथर्ववेदीयमुण्डकोपनिषदि द्वितीयमुण्डके द्वितीयः खण्डः
इत्यथर्ववेदीयमुण्डकोपनिषदि द्वितीयमुण्डकं समाप्तम्

उक्तस्यैवार्थस्य संक्षेपाभिधायका उत्तरे मन्त्राश्चयोऽपि—हिरण्मये ज्योतिर्मये बुद्धिविज्ञानप्रकाशे परे कोशे कोश इवासेः । आत्मस्वरूपोपलब्धिस्थानत्वात्परं तत्सर्वाभ्यन्तरत्वात्तस्मिन्विरजमविद्याद्यशेषदोषरजोमलवर्जितं ब्रह्म सर्वमहत्त्वात्सर्वात्मत्वाच्च निष्कलं निर्गताः कला यस्मात्तन्निष्कलं निरवयवमित्यर्थः । यस्माद्विरजं निष्कलं चातस्तच्छुभ्रं शुद्धं ज्योतिषां सर्वप्रकाशात्मनामग्न्यादीनामपि तज्ज्योतिरवभासकम् । अग्न्यादीनामपि ज्योतिष्ट्वमन्तर्गतब्रह्मात्मचैतन्यज्योतिर्निमित्तमित्यर्थः । तद्धि परं ज्योतिर्यदन्यानवभास्यमात्मज्योतिस्तद्यदात्मविदः आत्मानं स्वं शब्दादिविषयबुद्धिप्रत्ययसाक्षिणं ये विवेकिनो विदुर्विजानन्ति त आत्मविदस्तद्विदुरात्मप्रत्ययानुसारिणः । यस्मात्परं ज्योतिस्तस्मात्त एव तद्विदुर्नेतरे बाह्यार्थप्रत्ययानुसारिणः ॥ ९ ॥

कथं तज्ज्योतिषां ज्योतिरित्युच्यते—न तत्र तस्मिन्स्वात्मभूते ब्रह्मणि सर्वावभासकोऽपि सूर्यो भाति । तद्ब्रह्म न प्रकाशयतीत्यर्थः । स हि तस्यैव भासा सर्वमन्यदनात्मजातं प्रकाशयतीत्यर्थः । न तु तस्य स्वतः प्रकाशनसामर्थ्यम् । तथा न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निरस्मद्गोचरः । किं बहुना । यदिदं जगद्भाति तत्तमेव परमेश्वरं स्वतो भारूपत्वाद्भान्तं दीप्यमानमनुभात्यनुदीप्यते । यथा जलोल्मुकाद्यग्निसंयोगादग्निं दहन्तमनुदहति न स्वतस्तद्वत्तस्यैव भासा दीप्त्या सर्वमिदं सूर्यादिजगद्विभाति । यत एवं तदेव ब्रह्म भाति च विभाति च कार्यगतेन विविधेन भासा अतस्तस्य ब्रह्मणो भारूपत्वं स्वतोऽवगम्यते । न हि स्वतोऽविद्यमानं भासनमन्यस्य कर्तुं शक्नोति । घटादीनामन्यावभासकत्वादर्शनाद्भारूपाणां चाऽऽदित्यादीनां तद्दर्शनात् ॥ १० ॥

यत्तज्ज्योतिषां ज्योतिर्ब्रह्म तदेव सत्यं सर्वं तद्विकारं वाचारम्भणं विकारो नामधेयमात्रमनृतमितरदित्येत-

भातीति णिजन्तार्थाध्याहारेण व्याख्यातम् । तस्य भासा सर्वमिदं विभातीत्यस्य ब्रह्मणः स्वतो भारूपत्वे तात्पर्यं कथयति—यत एवं तदेव ब्रह्म भाति चेति ॥ ९-१० ॥

उपसंहारमन्त्रस्य तात्पर्यमाह—यतज्ज्योतिषां ज्योतिस्तेन ब्रह्मणा विविधं क्रियत इति तद्विकारं सर्वं

अथ मुक्त इति विरुद्धं पदद्वयमिति । तन्न । यतः जीवसम्बन्ध्येवाज्ञानादि वर्तमानकर्मसम्पादकरूपेण वर्तते । जन्मान्तरादिसकलसंसारारम्भकाविद्याकामकर्मबन्धनिर्मुक्तः वर्तमानभोगभागित्वाच्च जीवन् इति जीवन्मुक्त इति न विरुद्धम्, "ब्रह्मीभूतत्वं चाब्रह्मत्वभ्रमनिवृत्त्या" इत्युक्तम् । (४-१-१५)

१. न तत्र सूर्यो भाति—अयं मन्त्रः काठकोपनिषद्यपि श्रूयते, तथापि न तत्र तत्प्रतिपाद्यार्थविषये संशयः । त्रयाणामेव चैवमुपन्यासः प्रश्नश्चेत्यनेन सूत्रेण तत्राग्निजीवपरमात्मव्यतिरिक्तपदार्थस्य निरूपणानवकाशात् । अतो मुण्डकस्थमिदं वाक्यमधिकृत्य विचारः कृतः 'अनुकृतेस्तस्य चे'ति सूत्रेण—अत्र श्रुतौ निर्दिष्टः तेजो धातुः किञ्चिद्भौतिकं तेजो न ब्रह्म—'तमेव भान्तमनुभाती'त्युक्तानुभानस्य समानस्वभावकेष्वेव दर्शनात्, गच्छन्तमनुगच्छतीतिवत् इति प्राप्ते सिद्धान्तः ब्रह्मैवास्मिन्मन्त्रे प्रतिपाद्यते भानरूपत्वात् । अयःपिण्डः अग्निं दहन्तमनुदहति इति भिन्नस्वभावकेष्वप्यनुकारदर्शनात् । पूर्वमन्त्रे ज्योतिषां ज्योतिरित्यनेन ब्रह्मणः प्रकृतत्वात् । कथं तज्ज्योतिषां ज्योतिरिति प्रश्नसमाधानार्थमस्य मन्त्रस्य प्रवृत्तेः ।

[1]द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं [2]स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ १ ॥

**मथं विस्तरेण हेतुतः प्रतिपादितं निगमनस्थानीयेन मन्त्रेण पुनरुपसंहरति—ब्रह्मैवोक्तलक्षणमिदं यत्पुरस्तादग्रे अब्रह्मेवाविद्यादृष्टीनां प्रत्यवभासमानं, तथा पश्चाद्ब्रह्म तथा दक्षिणतश्च तथोत्तरेण तथैवाधस्तादूर्ध्वं च सर्वतोऽन्यदिव कार्यकारेण प्रसृतं प्रगतं नामरूपवदवभासमानम्। किं बहुना ब्रह्मैवेदं विश्वं समस्तमिदं जगद्वरिष्ठं वरतमम्। अब्रह्म- ५
प्रत्ययः सर्वोऽविद्यामात्रो रज्ज्वामिव सर्पप्रत्ययः। ब्रह्मैवैकं परमार्थसत्यमिति वेदानुशासनम् ॥ ११ ॥**

इत्यथर्ववेदीयमुण्डकोपनिषद्भाष्ये द्वितीयमुण्डके द्वितीयः खण्डः
इत्यथर्ववेदीयमुण्डकोपनिषद्भाष्ये द्वितीयं मुण्डकं समाप्तम्

**परा विद्योक्ता यया तदक्षरं पुरुषाख्यं सत्यमधिगम्यते। यदधिगमे हृदयग्रन्थ्यादिसंसारकारणस्याऽऽत्यन्तिक- विनाशः स्यात्। तद्दर्शनोपायश्च योगो धनुराद्युपादानकल्पनयोक्तः। अथेदानीं तत्सहकारीणि सत्यादिसाधनानि १०
वक्तव्यानीति तदर्थमुत्तरारम्भः। प्राधान्येन तत्त्वनिर्धारणं च प्रकारान्तरेण क्रियते अत्यन्तदुरवगाह्यत्वात्कृतमपि।**

जगत्सर्वं ब्रह्मैवेति [3]बाधायां सामानाधिकरण्यं योऽयं स्थाणुः पुमानसाविति[4]वदन्वयव्यतिरेकाभावपरिहारेण तावन्मात्रत्वं बोध्यते ॥ ११ ॥

इत्यथर्ववेदीयमुण्डकोपनिषद्भाष्यटीकायां द्वितीयमुण्के द्वितीयः खण्डः
इत्यथर्ववेदीयमुण्डकोपनिषद्भाष्यटीकायां द्वितीयं मुण्डकं समाप्तम् १५

प्राधान्येनेति। अपूर्वत्वेन तात्पर्यविषयतयेत्यर्थः। द्वा सुपर्णेत्यादौ द्विवचनस्याऽऽकारश्छान्दसः। जीवस्याज्ञत्वेन नियम्यत्वेन योग्यत्वादीश्वरस्य सर्वज्ञत्वेन नियामकत्वशक्तियोगाच्छोभनमुचितम्। नियम्यनियामकभाव-

---

१. अस्मिन्मन्त्रे 'तयोरन्यः पिप्पलं स्वाद्वत्ति' इति सत्त्वं, 'अनश्नन्नन्योऽभिचाकशीति इति क्षेत्रज्ञः' इत्यादिना अन्तःकरणजीवौ द्वा सुपर्णेति ग्राह्यौ इति यद्यपि पैङ्गिरहस्यब्राह्मणं तथापि न क्षतिः। अन्तः- करणातिरिक्तो जीवः अनुपाधिकः शुद्ध एव। स चेश्वरः एवेति ब्रह्मप्रकरणं न विरुध्यते इति निर्णीतं २०
ब्रह्मसूत्रभाष्ये। अत्र जीवेश्वरपरतया व्याख्यातृणामन्येषां ब्राह्मणविरोधः, मन्त्रब्राह्मणयोरैकार्थ्यस्य सर्वसम्प्रतिपन्नत्वात्। सत्त्वशब्दोऽपि उपनिषत्सु 'सत्त्वादधिमहानात्मा' इत्यत्र बुद्धिपर इत्येवोक्तम्।

यत्तु मतान्तरे समाने वृक्ष इत्युत्तरमन्त्रानुरोधेन अस्य जीवपरत्वस्याङ्गीकरणीयत्वात् पैङ्गिरहस्य ब्राह्मणस्यायमर्थः—सत्त्वं बद्धजीवः क्षेत्रज्ञः परमात्मा। येन विशिष्टः स्वप्नं पश्यतीत्यर्थः। शारीरक- शब्दोऽपि परमात्मपरः चिदचिच्छरीरकत्वात्। एतत्सर्वं स्वमतस्य कथञ्चित् तत्रोद्भावनमेव परमात्मा २५
स्वतः एव सर्वज्ञः, तस्य स्वत एव स्वप्नदर्शनसम्भवे येन विशिष्टः इत्यसङ्गतम्।

अत्र 'इयदामननात्' इत्यधिकरणे द्वा सुपर्णेति मन्त्रप्रतिपाद्यविद्यायाः 'ऋतं पिबन्ताविति मन्त्रप्रति- पाद्यायाश्च विद्याया ऐक्यं निर्णीतम्। उभयत्रापि इयत्तापरिच्छिन्नस्य द्वित्वोपपन्नस्य विषयस्य प्रतीतेः इति हेतुः प्रदर्शितः। इदं च द्वा सुपर्णामन्त्रस्य जीवेश्वरपरत्वमादायैवेति ज्ञेयम्।

२. स्वाद्वत्ति—स्वादु यथा तथा अत्ति अल्पं वा बृहद्वा भवतु कर्मफलानुभवे जीवानां सुखानुभवदर्शनात्। ३०

३. बाधायां सामान्याधिकरण्यम्—बाध्यमानतादात्म्योपलक्षिताधिष्ठानव्यक्तिप्रतिपादकसमानविभक्तिकनाम- द्वयत्वं (ल० च०) यथा योऽयं स्थाणुः पुमानेष इति—अत्र हि स्थाणुतादात्म्याभावोपलक्षितपुरुष- व्यक्तिमात्रप्रतिपादकत्वात् लक्षणसङ्गतिः।

४. अन्वयव्यतिरेकाभावपरिहारेणेति—अन्वयः—स्थाणुत्वं तस्य भानं, व्यतिरेकः—तदभावः तस्य च भानं तदुभयं विना शुद्धपुरुषभानमित्यर्थः। अन्वयव्यतिरेकयोरुभयोरपि परिहारेणेत्यर्थः। व्यतिरेकाभाव ३५
इति—व्यतिरेकरूपस्याभावस्य परिहारेणेत्यर्थः। अन्वयव्यतिरेकपरिहारेणेति वा अन्वयव्यतिरेकभान- परिहारेणेति वा पाठश्चेत् सुगमः।

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ २ ॥

तत्र सूत्रभूतो मन्त्रः परमार्थवस्त्ववधारणार्थमुपन्यस्यते—द्वा द्वौ सुपर्णा सुपर्णौ शोभनपतनौ सुपर्णौ पक्षिसामान्याद्वा सुपर्णौ सयुजा सयुजौ सहैव सर्वदा युक्तौ सखाया सखायौ [1]समानाख्यानौ समानाभिव्यक्तिकारणावेवंभूतौ सन्तौ समानमविशेषमुपलब्ध्यधिष्ठानतयैकं वृक्षं वृक्षमिवोच्छेदनसामान्याच्छरीरं वृक्षं परिषस्वजाते परिष्वक्तवन्तौ। सुपर्णाविवैकं वृक्षं फलोपभोगार्थम्। अयं हि वृक्ष ऊर्ध्वमूलोऽवाक्शाखोऽश्वत्थोऽव्यक्तमूलप्रभवः क्षेत्रसंज्ञकः सर्वप्राणिकर्मफलाश्रयस्तं परिष्वक्तौ सुपर्णाविवाविद्याकामकर्मवासनाश्रयलिङ्गोपाध्यात्मेश्वरौ। तयोः परिष्वक्तयोरन्य एकः क्षेत्रज्ञो लिङ्गोपाधिः वृक्षमाश्रितः पिप्पलं कर्मनिष्पन्नं सुखदुःखलक्षणं फलं स्वाद्वनेकविचित्रवेदनास्वादरूपं स्वादति भक्षयत्युपभुङ्क्तेऽविवेकतः। अनश्नन्नन्य इतर ईश्वरो नित्यशुद्धबुद्धमुक्तस्वभावः सर्वज्ञः सर्वसत्त्वोपाधिरीश्वरो नाश्नाति। प्रेरयिता ह्यसावुभयोर्भोज्यभोक्त्रोर्नित्यसाक्षित्वसत्तामात्रेण। स त्वनश्नन्नन्योऽभिचाकशीति पश्यत्येव केवलम्। दर्शनमात्रं हि तस्य प्रेरयितृत्वं राजवत् ॥ १ ॥

तत्रैवं सति—समाने वृक्षे यथोक्ते शरीरे पुरुषो भोक्ता जीवोऽविद्याकामकर्मफलरागादिगुरुभाराक्रान्तोऽलाबुरिव सामुद्रे जले निमग्नो निश्चयेन देहात्मभावमापन्नोऽयमेवाहममुष्य पुत्रोऽस्य नप्ता कृशः स्थूलो गुणवान्निर्गुणः सुखी दुःखीत्येवंप्रत्ययो नास्त्यन्योऽस्मादिति जायते म्रियते संयुज्यते वियुज्यते च सम्बन्धिबान्धवैः। अतोऽनीशया न कस्यचित्समर्थोऽहं पुत्रो मम विनष्टो मृता मे भार्या किं मे जीवितेनेत्येवं दीनभावोऽनीशा[2] तया शोचति सन्तप्यते मुह्यमानोऽनेकैरनर्थप्रकारैरविवेकतया चिन्तामापद्यमानः। स एवं प्रेततिर्यङ्मनुष्यादियोनिष्वाजवं जवीभावमापन्नः कदाचिदनेकजन्मसु [3]शुद्धधर्मसञ्चितनिमित्ततः केनचित्परमकारुणिकेन दर्शितयोगमार्गोऽहिंसासत्यब्रह्मचर्यसर्वत्यागशमदमादिसम्पन्नः समाहितात्मा सञ्जुष्टं सेवितमनेकैर्योगमार्गैः कर्मिभिश्च यदा यस्मिन्काले पश्यति ध्यायमानोऽन्यं वृक्षोपाधिलक्षणाद्विलक्षणमीशमसंसारिणमशनायापिपासाशोकमोहजरामृत्व्वतीतमीशं सर्वस्य जगतोऽयमहमस्म्यात्मा सर्वस्य समः सर्वभूतस्थो नेतरोऽविद्याजनितोपाधिपरिच्छिन्नो मायात्मेति विभूति महिमानं च जगद्रूपमस्यैव मम परमेश्वरस्येति यदैवं द्रष्टा तदा वीतशोको भवति सर्वस्माच्छोकसागराद्विप्रमुच्यते कृतकृत्यो भवतीत्यर्थः ॥ २ ॥

गमनं ययोस्तौ शोभनपतनौ। **पक्षिसामान्याद्वेति**। वृक्षाश्रयणादिश्रवणादित्यर्थः। ऊर्ध्वमुत्कृष्टं ब्रह्म मूलमधिष्ठानमस्येत्यूर्ध्वमूलोऽवाञ्चः प्राणादयः शाखा इवास्येत्यवाक्शाखः। श्वः स्थानं नियन्तुमस्य न शक्यमित्यश्वत्थः। अव्यक्तमव्याकृतं मूलमुपादानमन्वयि तस्मात्प्रभवतीति तथोक्तो यावदज्ञानभावीत्यर्थः। अविद्याकामकर्मवासनानामाश्रयो लिङ्गमुपाधिर्यस्याऽऽत्मनः स जीवस्तथोक्तः स चेश्वरश्च तावित्यर्थः। सत्त्वं मायाख्यमुपाधिरस्येति सत्त्वोपाधिः। ज्ञानात्मकस्यामलसत्त्वराशेरिति ह्युक्तम् ॥ १ ॥

आवरणं विक्षेपश्च द्वयमविद्यायाः कार्यम्। तत्रेश्वरभावाप्रतिपत्तिरनीशाऽऽवरणं शोचतीति विक्षेपस्तदुभयहेतुरनिर्वाच्यमज्ञानं मोहः। तेन विशिष्टोऽनेकैरनर्थप्रकारैर्हं करोमीत्यादिभिरविवेकतया तादात्म्यापन्नतयेत्यर्थः। आजवमनवरतं जवीभावं निकृष्टभावं लक्षणया लघुभावं कर्मवायुप्रेरिततया जवीभावं क्षैप्रद्यमापन्नः पूर्ववदित्यभेदेनेत्यर्थः ॥ २ ॥

---

१. समानाख्यानौ—आख्यानं प्रकाशः उभयोः अत एव स्वप्रकाशत्वादिति कल्पतरौ व्याख्यातम्। समानाभिव्यक्तिकारणौ। उभयो हृदयमेकमेवाभिव्यक्तिकारणम्।

२. अत्र अनीशा ईश्वरभावस्यास्फूर्तिः, अहमीश्वराद्भिन्नः इति भ्रमेण शरीरादौ अभेदभ्रान्त्या शोचति। स यदा अन्यं शरीरादिविविक्तं शुद्धमीशमहं ब्रह्मास्मि इति साक्षात्करोति तदा अस्य भगवतो महिमानमाप्नोति—इति इत्यत्र गुणाभावच्छान्दसः एतीत्यर्थः। अत्र यद्यपि वृक्षसामान्यमेवोक्तं तथापि अश्वस्थ एव ग्राह्यः। अन्यत्र काठकोपनिषदि 'एषोऽश्वत्थः सनातन' इत्युक्तत्वात्। अत एव पिप्पलमिति अश्वत्थफलं निर्दिष्टम्। 'फलेलुक्' इत्यनेन विकारावयवार्थप्रत्ययलोपोक्तेः, पिप्पलस्य फलं पिप्पलमित्यनुपपन्नम्।

३. शुद्धधर्मः—ईश्वरार्पणबुद्ध्या क्रियमाणं नित्यनैमित्तिककर्मरूपो धर्मः।

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान्पुण्यपापे विधूय निरञ्जनः [1]परमं साम्यमुपैति ॥ ३ ॥
प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन्विद्वान्भवते नातिवादी ।
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥ ४ ॥

अन्योऽपि मन्त्र इममेवार्थमाह सविस्तरम् —यदा यस्मिन्काले पश्यः पश्यतीति विद्वान्साधक इत्यर्थः । पश्यते ५
पश्यति पूर्ववत् रुक्मवर्णं स्वयंज्योतिःस्वभावं रुक्मस्येव वा ज्योतिरस्याविनाशि, कर्तारं सर्वस्य जगत ईशं पुरुषं ब्रह्मयोनिं ब्रह्म च तद्योनिश्चासौ ब्रह्मयोनिस्तं ब्रह्मयोनिं ब्रह्मणो वाऽपरस्य योनिं स यदा चैवं पश्यति तदा स विद्वान्पश्यः पुण्यपापे बन्धनभूते कर्मणी समूले विधूय निरस्य दग्ध्वा निरञ्जनो निर्लेपो विगतक्लेशः परमं प्रकृष्टं निरतिशयं साम्यं समतामद्वयलक्षणं द्वैतविषयाणि साम्यान्यतोऽर्वाञ्च्येवातोऽद्वयलक्षणमेतत्परमं साम्यमुपैति प्रतिपद्यते ॥३॥ १०

किञ्च—योऽयं प्राणस्य प्राणः पर ईश्वरो ह्येष प्रकृतः सर्वैर्भूतैर्ब्रह्मादिस्तम्बपर्यन्तैः । इत्थंभूतलक्षणे तृतीया । सर्वभूतस्थः सर्वात्मा सन्नित्यर्थः । विभाति विविधं दीप्यते । एवं सर्वभूतस्थं यः साक्षादात्मभावेनायमहमस्मीति विजानन्विद्वान्वाक्यार्थज्ञानमात्रेण स [2]भवते भवति न भवतीत्येतत्किम्? अतिवाद्यतीत्य सर्वानन्यान्वदितुं शीलमस्येत्यतिवादी । यस्त्वेवं साक्षादात्मानं प्राणस्य प्राणं विद्वानतिवादी स न भवतीत्यर्थः । सर्वं यदाऽऽत्मैव नान्यदस्तीति दृष्टं तदा किं ह्यसावतीत्य वदेत् । यस्य त्वपरमन्यद्दृष्टमस्ति स तदतीत्य वदति । अयं तु विद्वानात्मनोऽन्यन्न पश्यति १५
नान्यच्छृणोति नान्यद्विजानाति । अतो नातिवदति । किञ्चाऽऽत्मक्रीड आत्मन्येव च क्रीडा क्रीडनं यस्य नान्यत्र पुत्रदारादिषु स आत्मक्रीडः । तथाऽऽत्मरतिरात्मन्येव च रती रमणं प्रीतिर्यस्य स आत्मरतिः । क्रीडा बाह्यसाधनसापेक्षा । रतिस्तु साधननिरपेक्षा बाह्यविषयप्रीतिमात्रमिति विशेषः । तथा क्रियावाञ्ज्ञानध्यानवैराग्यादिक्रिया यस्य सोऽयं क्रिया-

[3]पूर्ववदित्यभेदेनेत्यर्थः ॥ ३ ॥

आत्मनि रतिरात्मरतिस्तत्पुरुषः सैव क्रियाऽस्यास्तीत्यात्मरतिक्रियावानिति मतुबेवैकः प्रतीयते कथमुक्तं २०
बहुव्रीहिमतुबर्थयोरन्यतरोऽतिरिच्यत इति । सत्यमसमासपाठे द्वयोरर्थवत्त्वमासीत्समासपाठे त्वन्यतरो मतुबतिरिच्यते

---

१. परमं साम्यमभेद एव । मतान्तरे अपहतपाप्मत्वादिगुणाष्टकेन साम्यं प्राप्नोति इत्युक्तम् । तत्र यदि ते गुणाः नवतयोत्पद्यन्ते तदा 'यत्कृतकं तदनित्यमि'ति न्यायात् नाशप्रसङ्गः । यदि पूर्वसिद्धानामेवाभिव्यक्तिः, तदा तत्त्वमसीत्यादिना परमेश्वरस्यैव देहं प्रविश्य जीवभावेनावस्थानात् परमं साम्यमभेदएव । भोगमात्रसाम्याङ्गीकारे परमसाम्यानुपपत्तिरेव । २५

२. भवते भवतीत्यर्थः पूर्वमन्त्रः यदा पश्यः पश्यते इति ज्ञानिनमधिकृत्य प्रवृत्तः । अत्रापि आत्मक्रीडा इत्याद्युक्तेः जीवन्मुक्तपरत्वमस्य मन्त्रस्य स्पष्टमेव । यत्तु मतान्तरे 'तेनातिवादी भवे'ति योजनया 'आत्मज्ञानेन अतिवादी भवे'ति व्याख्यातम् । तत्र अतिवदने नियोगश्चेत् तत्कुर्वन् कथं नाम विद्वान् आत्मक्रीडः आत्मरतिश्च भवेत् । अतिवदन एव कालयापनात् । अपि च छान्दोग्ये 'यद्यतिवाद्यसीति ब्रूयान्नापह्नुवीत' इति स्वभावप्राप्तत्वाभिधानात् तदेकवाक्यतया अतिवादी यदि कश्चिद्भवेत् तदा ३०
सः नातिवादी, सत्यवाद्येवेत्यर्थः । क्रियावान् वरिष्ठ इति नित्यनैमित्तिकक्रियावानित्यर्थकरणे तस्यात्मक्रीडत्वात्मरतित्वयोरनुपपत्तिरेव । अतः ज्ञानध्यानादिक्रियावानित्येवार्थः । अपि च 'तपसो वाप्यलिङ्गात्' इत्यनेन संन्यासः अत्रैव दृश्यते । अतः कथं संन्यासिनः नित्यनैमित्तिकक्रियावत्त्वं, यद्यपि स शिखायज्ञोपवीतवान् । भार्याभावेनाग्निहोत्राद्यभावात् ।

३. पूर्ववत्—पूर्वशरीर इवाभेदमापन्नः संसरतीत्यर्थः द्वैतविषयाणि साम्यानि सादृश्यरूपाणि तद्गतभूयो- ३५
धर्मवत्त्वरूपाणि ।

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ।
अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥ ५ ॥
सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ।
येनाऽऽक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥ ६ ॥

५ वान् । समासपाठ आत्मरतिरेव क्रियाऽस्य विद्यत इति [1]बहुव्रीहिमतुबर्थयोरन्यतरोऽतिरिच्यते । केचित्त्वग्निहोत्रादि-कर्मब्रह्मविद्ययोः समुच्चयार्थमिच्छन्ति । तच्चैष ब्रह्मविदां वरिष्ठ इत्यनेन मुख्यार्थवचनेन विरुध्यते । न हि बाह्यक्रीड आत्मरतिश्च भवितुं शक्तः कश्चित्, बाह्यक्रियाविनिवृत्तो ह्यात्मक्रीडो भवति बाह्यक्रियात्मक्रीडयोर्विरोधात् । न हि तमःप्रकाशयोर्युगपदेकत्र स्थितिः सम्भवति । तस्मादसत्प्रलपितमेवैतदनेन ज्ञानकर्मसमुच्चयप्रतिपादनम् । 'अन्या वाचो विमुञ्चथ" "संन्यासयोगात्" इत्यादिश्रुतिभ्यश्च । तस्मादयमेवेह क्रियावान्यो ज्ञानध्यानादिक्रियावान्सोऽभिन्नार्थ-
१० मर्यादः संन्यासी । य एवंलक्षणो नातिवाह्यात्मक्रीड आत्मरतिः क्रियावान्ब्रह्मनिष्ठः स ब्रह्मविदां सर्वेषां वरिष्ठः प्रधानः ॥ ४ ॥

अधुना सत्यादीनि भिक्षोः सम्यग्ज्ञानसहकारीणि साधनानि विधीयन्ते निवृत्तिप्रधानानि—सत्येनानृत-त्यागेन मृषावदनत्यागेन लभ्यः प्राप्तव्यः । किञ्च तपसा हीन्द्रियमनएकाग्रतया "मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तप" इति स्मरणात् । तद्वचनानुकूलमात्मदर्शनाभिमुखीभावात्परमं साधनं तपो नेतरच्चान्द्रायणादि । एष आत्मा
१५ लभ्य इत्यनुषङ्गः सर्वत्र । सम्यग्ज्ञानेन यथाभूतात्मदर्शनेन ब्रह्मचर्येण मैथुनासमाचारेण । नित्यं सर्वदा नित्यं सत्येन नित्यं तपसा नित्यं सम्यग्ज्ञानेनेति सर्वत्र नित्यशब्दोऽन्त्यदीपिकान्यायेनानुषक्तव्यः । वक्ष्यति च—"न येषु जिह्ममनृतं न माया च" इति । कोऽसावात्मा य एतैः साधनैर्लभ्य इत्युच्यते । अन्तःशरीरेऽन्तर्मध्ये शरीरस्य पुण्डरीकाकाशे ज्योतिर्मयो हि रुक्मवर्णः शुभ्रः शुद्धो यमात्मानं पश्यन्त्युपलभन्ते यतयो यतनशीलाः संन्यासिनः क्षीणदोषाः क्षीण-क्रोधादिचित्तमलाः स आत्मा नित्यं सत्यादिसाधनैः संन्यासिभिर्लभ्य इत्यर्थः । न कादाचित्कैः सत्यादिभिर्लभ्यते ॥५॥

२० सत्यादिसाधनस्तुत्यर्थोऽयमर्थवादः—[2]सत्यमेव सत्यवानेव जयति नानृतं नानृतवादीत्यर्थः । न हि सत्यानृतयोः केवलयोः पुरुषानाश्रितयोर्जयः पराजयो वा सम्भवति । प्रसिद्धं लोके सत्यवादिनाऽनृतवाद्यभिभूयते न विपर्ययोऽतः सिद्धं सत्यस्य बलवत्साधनत्वम् । किञ्च शास्त्रतोऽप्यवगम्यते सत्यस्य साधनातिशयत्वम् । कथम् ? सत्येन यथाभूत-वादव्यवस्थया पन्था देवयानाख्यो विततो विस्तीर्णः सातत्येन प्रवृत्तः । येन पथा ह्याक्रमन्ति क्रमन्त ऋषयो दर्शन-

विशिष्यते बाह्यक्रियानिवृत्तिलाभादित्यर्थः । एकदेशिव्याख्यामुद्भाव्य निराचष्टे—**केचित्त्वित्यादिना** । अनेन वचनेन
२५ ज्ञानकर्मसमुच्चयप्रतिपादनं क्रियत इत्येतदसत्प्रलपितमेवेति योजना ॥ ४ ॥

सम्यग्ज्ञानसहकारीणीति । अत्र सम्यग्ज्ञानशब्देन वस्तुविषयावगतिफलावसानं वाक्यार्थज्ञानमुच्यते । अवगतिफलस्य स्वकार्येऽविद्यानिवृत्तौ सहकार्यपेक्षासम्भवात् । अतोऽपरिपक्वज्ञानस्य सत्यादीनां च परिपक्वविद्या-लाभाय समुच्चय इष्यत एव । नैतावता **भास्कराभिमतसिद्धिः** । परिपक्वविद्यायाः सहकार्यपेक्षायां मानाभावात् । ततः कर्मासंश्लेषश्रवणाद्देवादीनां कर्मविहीनानां मुक्तिश्रवणाच्चेति ॥ ५ ॥

---

३० १. बहुव्रीहिमतुबर्थयोरिति—आत्मरतिः क्रिया यस्येति बहुव्रीहिसमासे आत्मरतिक्रियः इति रूपम् । आत्मरतिरेव क्रिया आत्मरतिक्रिया तद्वानिति मतुप् । उभयोरेक एव एवार्थः । तर्हि मतुबर्थोऽतिरिच्यते अर्थविशेषबोधको भवतीत्यर्थः । स च बाह्यक्रियारूपक्रियान्तरनिवृत्तिरित्यर्थः । अतिशायने मतुब्विधा-नात् एवं रूपोऽतिशयः लभ्यते न तु बहुव्रीहावित्यर्थः । एतादृशार्थः कर्मधारयोत्तरमतुपा लभ्यते न तु कर्मधारयघटितबहुव्रीहिणा ।

३५ २. सत्यमेव—अत्र सत्यपदेन सद्गुणयुक्तो भगवानुच्यते । तन्निष्ठ सद्भक्तिनिष्ठ एव जायते इति व्याख्या द्वैतिनाम् । तच्च नानृतं इत्यनेन विरुद्धम् । अनृतप्रतिद्वन्द्वितया सत्यवचनस्यैव पुरः स्फूर्तिकत्वात् । सत्यानृते इत्यादौ अनृतपदस्य असुरपरत्वे तु अप्रयुक्तलक्षणा ।

बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥ ७ ॥
न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ।
[1]ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥ ८ ॥

वन्तः कुहकमायाशाठ्याहङ्कारदम्भानृतवर्जिता ह्याप्तकामा विगततृष्णाः सर्वतो यत्र यस्मिंस्तत्परमार्थतत्त्वं सत्यस्योत्तम- ५
साधनस्य सम्बन्धि साध्यं परमं प्रकृष्टं निधानं पुरुषार्थरूपेण निधीयत इति निधानं वर्तते । तत्र च येन पथाऽऽक्रमन्ति स सत्येन वितत इति पूर्वेण सम्बन्धः ॥ ६ ॥

किं तर्त्किधर्मकं च तदित्युच्यते—बृहन्महच्च तत्प्रकृतं ब्रह्म सत्यादिसाधनं सर्वतो व्याप्तत्वात् । दिव्यं स्वयं-प्रभमनिन्द्रियगोचरमत एव न चिन्तयितुं शक्यतेऽस्य रूपमित्यचिन्त्यरूपम् । सूक्ष्मादाकाशादेरपि तत्सूक्ष्मतरं, निरतिशयं हि सौक्ष्म्यमस्य सर्वकारणत्वाद्विभाति विविधमादित्यचन्द्राद्याकारेण भाति दीप्यते । किञ्च दूराद्विप्रकृष्ट- १०
देशात्सुदूरे विप्रकृष्टतरे देशे वर्ततेऽविदुषामत्यन्तागम्यत्वात्तद्ब्रह्म । इह देहेऽन्तिके समीपे च विदुषामात्मत्वात् । सर्वान्तरत्वाच्चा[2]ऽऽकाशस्याप्यन्तरश्रुतेः । इह पश्यत्सु चेतनावत्स्वित्येतन्निहितं स्थितं दर्शनादिक्रियावत्त्वेन योगि-भिर्लक्ष्यमाणम् । क्व ? गुहायां बुद्धिलक्षणायाम् । तत्र हि निगूढं लक्ष्यते विद्वद्भिः तथाऽप्यविद्यया संवृतं सन्न लक्ष्यते तत्रस्थमेवाविद्वद्भिः ॥ ७ ॥

पुनरप्यसाधारणं तदुपलब्धिसाधनमुच्यते—यस्मान्न चक्षुषा गृह्यते केनचिदप्यरूपत्वान्नापि गृह्यते वाचाऽनभि- १५
धेयत्वान्न चान्यैर्देवैरितरेन्द्रियैः । तपसः सर्वप्राप्तिसाधनत्वेऽपि न तपसा गृह्यते । तथा वैदिकेनाग्निहोत्रादिकर्मणा प्रसिद्धमहत्त्वेनापि न गृह्यते । किं पुनस्तस्य ग्रहणे साधनमित्याह—ज्ञानप्रसादेनाऽऽत्मावबोधनसमर्थमपि स्वभावेन सर्वप्राणिनां ज्ञानं बाह्यविषयरागादिदोषकलुषितमप्रसन्नमशुद्धं सन्नावबोधयति नित्यं सन्निहितमप्यात्मतत्त्वं मला-वनद्धमिवाऽऽदर्शम् । विलुलितमिव सलिलम् । तद्यदेन्द्रियविषयसंसर्गजनितरागादिमलकालुष्यापनयनादादर्शसलिला-दिवत्प्रसादितं स्वच्छं शान्तमवतिष्ठते तदा ज्ञानस्य प्रसादः स्यात् । तेन ज्ञानप्रसादेन विशुद्धसत्त्वो विशुद्धान्तःकरणो २०
योग्यो ब्रह्म द्रष्टुं यस्मात्ततस्तस्मात्तु तमात्मानं पश्यते पश्यत्युपलभते निष्कलं सर्वावयवभेदवर्जितं ध्यायमानः सत्यादिसाधनवानुपसंहृतकरण एकाग्रेण मनसा ध्यायमानश्चिन्तयन् ॥ ८ ॥

कुहकं परवञ्चनम् । अन्तरन्यथा गृहीत्वा बहिरन्यथा प्रकाशनं माया । शाठ्यं विभवानुसारेणाप्रदानम् । अहङ्कारो मिथ्याभिमानः । दम्भो धर्मध्वजित्वम् । अनृतमयथादृष्टभाषणम् । एतैर्दोषैर्वर्जिता इत्यर्थः ॥ ६ ॥

सत्यस्य निधानं यदुक्तं तत्पुनर्विशेष्यत इत्याह—**किं तर्त्किधर्मकं च तदिति** ॥ ७ ॥ २५

ज्ञानप्रसादेनेति । अत्र ज्ञायतेऽर्थोऽनेनेति व्युत्पत्त्या बुद्धिरुच्यते । ध्यायमानो ज्ञानप्रसादं लभते । ज्ञान-प्रसादेनाऽऽत्मानं पश्यतीति क्रमो द्रष्टव्यः । संशयादिमलरहितस्य प्रमाणज्ञानस्यैव तत्त्वसाक्षात्कारहेतुत्वाद्ध्यान-क्रियायाः प्रमितिसाधनत्वाप्रसिद्धेरित्यर्थः ॥ ८ ॥

---

१. ज्ञानप्रसादेन—ज्ञानमन्तःकरणं तस्य प्रसादः मलराहित्यं तेन चित्तस्य शुद्धिरिति व्याख्यातम् । मतान्तरे—ज्ञानं ब्रह्मैव तस्य प्रसादः अनुग्रहः तेन चित्तशुद्धिरितिव्याख्या । यद्यपि 'ईश्वरानुग्रहादेव ३०
पुंसामद्वैतवासने'ति स्मृतेः ईश्वरानुग्रहः वेदान्तविचारे मनःप्रवृत्तावेवावश्यकः तथापि चित्तशुद्धि; रागाद्यभावः पापक्षयश्च । तदुभयं प्रयत्नसाध्यमेव नेश्वरानुग्रहादेव लभ्यम् । अनुग्रहस्यैव निष्काम-कर्मानुष्ठानलभ्यत्वात् । "यस्मिन् विशुद्धे विभवत्येष आत्मा" इत्यनेन चित्तशुद्धौ स्वहेतुना प्राप्तायां तत्रात्मा स्वात्मानं प्रकाशयतीत्युक्तेः ।

२. आकाशेति—'य आकाशे तिष्ठन्नाकाशादन्तरः' इति श्रुतेः । ३५

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाऽप्यलिङ्गात् ।
एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ॥ ४ ॥

संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः ।
ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः [1]सर्वमेवाऽऽविशन्ति ॥ ५ ॥

[2]वेदान्तविज्ञानसुनिश्चितार्थाः [3]संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
[4]ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥ ६ ॥

आत्मप्रार्थनासहायभूतान्येतानि च साधनानि बलाप्रमादतपांसि लिङ्गयुक्तानि संन्याससहितानि यस्मात्—अयमात्मा बलहीनेन बलप्रहीणेनाऽऽत्मनिष्ठाजनितवीर्यहीनेन न लभ्यो नापि लौकिकपुत्रपश्वादिविषयसङ्गनिमित्तप्रमादात् । तथा तपसो वाऽप्यलिङ्गाल्लिङ्गरहितात् । तपोऽत्र ज्ञानम् । लिङ्गं संन्यासः संन्यासरहिताज्ज्ञानान्न लभ्यत इत्यर्थः । एतैरुपायैर्बलाप्रमादसंन्यासज्ञानैर्यतते तत्परः सन्प्रयतते यस्तु विद्वान्विवेक्यात्मवित्तस्य विदुष एष आत्मा विशते संप्रविशति ब्रह्मधाम ॥ ४ ॥

कथं ब्रह्म विशत इत्युच्यते—संप्राप्य समवगम्यैनमात्मानमृषयो दर्शनवन्तस्तेनैव ज्ञानेन तृप्ता न बाह्येन्तृप्तिसाधनेन शरीरोपचयकारणेन । कृतात्मानः परमात्मस्वरूपेणैव निष्पन्नात्मानः सन्तः । वीतरागा विगतरागादिदोषाः । प्रशान्ता उपरतेन्द्रियाः । त एवंभूता सर्वगं सर्वव्यापिनमाकाशवत्सर्वतः सर्वत्र प्राप्य नोपाधिपरिच्छिन्नैकदेशेन । किं तर्हि तद्ब्रह्मैवाद्वयमात्मत्वेन प्रतिपद्य धीरा अत्यन्तविवेकिनो युक्तात्मानो नित्यसमाहितस्वभावाः सर्वमेव समस्तं शरीरपातकालेऽप्याविशन्ति भिन्ने घटे घटाकाशवदविद्याकृतोपाधिपरिच्छेदं जहति । एवं ब्रह्मविदो ब्रह्मधाम्न प्रविशन्ति ॥ ५ ॥

किञ्च—वेदान्तजनितविज्ञानं वेदान्तविज्ञानं तस्यार्थः परमात्मा विज्ञेयः सोऽर्थः सुनिश्चितो येषां ते वेदान्तविज्ञानसुनिश्चितार्थाः । ते च संन्यासयोगात्सर्वकर्मपरित्यागलक्षणयोगात्केवलब्रह्मनिष्ठास्वरूपाद्योगाद्यतयो यतनशीलाः शुद्धसत्त्वा शुद्धं सत्त्वं येषां संन्यासयोगात्ते शुद्धसत्त्वाः । ते ब्रह्मलोकेषु । संसारिणां ये मरणकालास्तेऽपरान्तास्तानपेक्ष्य मुमुक्षूणां संसारावसाने देहपरित्यागकालः परान्तकालस्तस्मिन्परान्तकाले । साधकानां बहुत्वाद्ब्रह्मैव लोको ब्रह्मलोक एकोऽप्यनेकवद्दृश्यते प्राप्यते वा । अतो बहुवचनं ब्रह्मलोकेष्विति ब्रह्मणीत्यर्थः । परामृताः परममृत-

वीर्यमिति मिथ्याज्ञानानभिभाव्यतालक्षणोऽतिशयः । अलिङ्गादिति । कथम् ? इन्द्रजनकगार्गिप्रभृतीनामप्यात्मलाभश्रवणात् । सत्यम् । संन्यासो नाम सर्वत्यागात्मकस्तेषामपि स्वत्वाभिमानाभावादस्त्येवाऽऽन्तरः संन्यासो बाह्यं तु लिङ्गमविवक्षितम् "न लिङ्गं धर्मकारणम्" इति स्मरणात् ॥ ४ ॥

नैष्कर्म्यसाहित्यं तु विवक्षितं ॥ ५ ॥

---

१. सर्वमेवाविशन्ति—अत्र द्वैतिनः—इतरैरज्ञेयतया ब्रह्म प्रविश्य इच्छया अन्तर्बहिस्सञ्चरन्तः भोगान् भुञ्जत इत्यर्थमाहुः । तत् कामनिवृत्तेः भगवत्प्राप्तिहेतुतयोक्तत्वात् निवृत्तकामानां पुनः तदुद्भवानुपपत्तेः चिन्त्यम् । मतान्तरेऽपि सर्वमनुभवन्तीत्यर्थाङ्गीकारे कामप्रहाणानुपपत्तिः ।

२. वेदान्तविज्ञानसुनिश्चितार्थाः सुनिश्चितवेदान्तविज्ञानार्था इति यावत् ।

३. संन्यासयोगाच्च शुद्धान्तःकरणाः—अत्र मतान्तरे काम्यकर्मत्यागेन परिशुद्धान्तःकरणा इति व्याख्यातम् । सर्वकर्मत्यागे श्रुतिसिद्धे नेदमुचितम् । तथाहि अयज्ञोपवीती कथं ब्राह्मण इति प्रश्नमुत्थाप्य तस्य ज्ञानमेव यज्ञोपवीतमित्युक्तं जाबालोपनिषदि । संन्यासाधिकरणे भास्करमतखण्डनमधिकृत्य सर्वकर्मसंन्यासः स्थापितः कल्पतरौ । यस्त्वात्मरतिरेव स्यात् इत्यारभ्य तस्य कार्यं न विद्यत इति च गीतासु । माध्वा अपि भगवति सर्वकर्मार्पणं संन्यासमाहुः, तदपि शास्त्रविरुद्धम् ।

४. 'ते ब्रह्मलोके तु' तैत्तिरीयारण्यकपाठः ।

[1]गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु ।
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वे एकीभवन्ति ॥ ७ ॥
[2]यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥ ८ ॥

ममरणधर्मकं ब्रह्माऽऽत्मभूतं येषां ते परामृता जीवन्त एव ब्रह्मभूताः परामृताः सन्तः परिमुच्यन्ति परि समन्तात्प्रदीपनिर्वाणवद्घटाकाशवच्च निवृत्तिमुपयान्ति । परिमुच्यन्ति परि समन्तान्मुच्यन्ते सर्वे न देशान्तरं गन्तव्यमपेक्षन्ते ।

"शकुनीनामिवाऽऽकाशे जले वारिचरस्य च । पदं यथा न दृश्येत तथा ज्ञानवतां गतिः ॥"

"अनध्वगा अध्वसु पारयिष्णव" इति श्रुतिस्मृतिभ्यां, देशपरिच्छिन्ना हि गतिः संसारविषयैव । परिच्छिन्नसाधनसाध्यत्वात् । ब्रह्म तु समस्तत्वान्न देशपरिच्छेदेन गन्तव्यम् । यदि हि देशपरिच्छिन्नं ब्रह्म स्यान्मूर्तद्रव्यवदाद्यन्तवदन्याश्रितं सावयवमनित्यं कृतकं च स्यात् । न त्वेवंविधं ब्रह्म भवितुमर्हति, अतस्तत्प्राप्तिश्च नैव देशपरिच्छिन्ना भवितुं युक्ता । अपि चाविद्यादिसंसारबन्धापनयनमेव मोक्षमिच्छन्ति ब्रह्मविदो न तु कार्यभूतम् ॥ ६ ॥

किञ्च मोक्षकाले या देहारम्भिकाः कलाः प्राणाद्यास्ताः स्वां स्वां प्रतिष्ठां गताः स्वं स्वं कारणं गता भवन्तीत्यर्थः । प्रतिष्ठा इति द्वितीयाबहुवचनम् । पञ्चदश पञ्चदशसंख्याका या अन्त्यप्रश्नपरिपठिताः प्रसिद्धा देवाश्च देहाश्रयाश्चक्षुरादिकरणस्थाः सर्वे प्रतिदेवतास्वादित्यादिषु गता भवन्तीत्यर्थः । यानि च मुमुक्षुणा कृतानि कर्माण्यप्रवृत्तफलानि प्रवृत्तफलानामुपभोगेनैव क्षीयमाणत्वाद्विज्ञानमयश्चाऽऽत्माऽविद्याकृतबुद्ध्याद्युपाधिमात्मत्वेन मत्वा जलादिषु सूर्यादिप्रतिबिम्बवदिह प्रविष्टो देहभेदेषु, कर्मणां तत्फलार्थत्वात्सह तेनैव विज्ञानमयेनाऽऽत्मना । अतो विज्ञानमयो विज्ञानप्रायः । त एते कर्माणि विज्ञानमयश्चाऽऽत्मोपाध्यपनये सति परेऽव्ययेऽनन्तेऽक्षये ब्रह्मण्याकाशकल्पेऽजेऽजरेऽमृतेऽभयेऽपूर्वेऽनपरेऽनन्तरेऽबाह्येऽद्वये शिवे शान्ते सर्वं एकी भवन्त्यविशेषतां गच्छन्त्येकत्वमापद्यन्ते जलाधारापनय इव सूर्यादिप्रतिबिम्बाः सूर्ये, घटाद्यपनय इवाऽऽकाशे घटाद्याकाशाः ॥ ७ ॥

किञ्च—यथा नद्यो गङ्गाद्याः स्यन्दमाना गच्छन्त्यः समुद्रे समुद्रं प्राप्यास्तमदर्शनमविशेषात्मभावं गच्छन्ति

प्रदीपस्य वर्तिकृतावच्छेदध्वंसे यथा तेजःसामान्यतापत्तिस्तद्वदित्याह—**प्रदीपनिर्वाणवदिति**। पदं पादन्यासः प्रतिबिम्बं च । न दृश्येताभावादेवेत्यर्थः । **अध्वस्विति** । संसाराध्वनां पारयिष्णवःपारयितुं समापयितुमिच्छन्तीति समाप्तिकामा अनध्वगा भवन्तीत्यर्थः । तर्कतोऽपीहैव मोक्षो वक्तव्य इत्याह—**देशपरिच्छिन्ना हीत्यादिना** ॥ ६ ॥

स्वाः प्रतिष्ठाः प्रति गता भवन्तीति भूतांशानां भौतिकानां च महाभूतेषु लयो दर्शितः । **अन्त्यप्रश्नेति** । ब्राह्मणग्रन्थे षष्ठप्रश्ने प्राणाद्या याः कलाः पठिता इत्यर्थः । मायामयमहाभूतानामंशावष्टब्धैर्जीवाविद्याभूतसूक्ष्मैः प्रातिस्विकैरदृष्टसहकृतैः प्रातिस्विकाः प्राणादय आरभ्यन्ते । ते च कर्माक्षिप्तैर्देवैः सूर्यादिभिरधिष्ठीयन्ते । कर्मणो भोगेनावसाने ते देवाः स्वस्थानं गच्छन्ति । यच्च प्रातिस्विकं स्वाविद्याकार्यं तच्च सर्वं ब्रह्मैव सम्पद्यत इत्याह—**यानि चेत्यादिना** ॥ ७-८ ॥

---

१. अत्र पञ्चदशकलानिर्दिष्टाः । प्रश्नोपनिषदि तु षोडशकलाः । घ्राणमनसोः एकपृथिव्युपादानकत्वेनैकत्वविवक्षयाऽत्र पञ्चदशत्वमुक्तम् । प्रश्नोपनिषदि विद्वद्दृष्टिमाश्रित्य कलानां पुरुषे लय उक्तः । अत्र तु पार्श्वस्थानामविदुषां दृष्टिमाश्रित्य कलानां स्वस्वप्रकृतिषु लय इति । तानि परे तथाह्यह इति सूत्रे भाष्यम्—"देवाश्चक्षुराद्यनुग्राहकाः स्वोपकारं परित्यज्य स्वस्वरूपे तिष्ठन्तीत्यर्थः" ।

२. 'यथा नद्यः' इत्यनेन ब्रह्मणि एकीभाव उक्तः । यथोदकं शुद्धे शुद्धमित्यपि दृष्टान्तः काठके । उभयत्रापि जले जलान्तरप्रवेशे महत्तरजलान्तरं जायते । पूर्वजलं नश्यतीति नैयायिकाः । तत्र च नामरूपविमोके जलमात्रमवशिष्यते । यत्तु मतान्तरे नामरूपात्मकभेदकाकारप्रहाणमात्रमि'त्युक्तम् । अत्र रूपमाकारविशेषः । तदपि नष्टं चेत् जीवे किमवशिष्येत । नाश एव जीवस्य स्यात् । अस्माभिरप्याभासवादे मोक्षे जीवनाश एवेष्यते । अपि च अणुर्जीवः परमात्मा विभुः तत्रोपाधिविमोकेनैव एकीभावो वक्तव्यः, अन्यथा संसारदशायामपि तदापातात् । साक्षात्कारः अत्रैव जायते । तेन चोपाधिलये सति

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति ।
तरति शोकं तरति [१]पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति ॥ ९ ॥

तदेतदृचाऽभ्युक्तम्—
[२]क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः ।
तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥ १० ॥

प्राप्नुवन्ति नाम च रूपं च नामरूपे विहाय हित्वा तथाऽविद्याकृतनामरूपाद्विमुक्तः सन्विद्वान्परादक्षरात्पूर्वोक्तात्परं दिव्यं पुरुषं यथोक्तलक्षणमुपैत्युपगच्छति ॥ ८ ॥

ननु श्रेयस्यनेके विघ्नाः प्रसिद्धा अतः क्लेशानामन्यतमेनान्येन वा देवादिना च विघ्नितो ब्रह्मविदप्यन्यां गतिं मृतो गच्छति न ब्रह्मैव । न । विद्ययैव सर्वप्रतिबन्धस्यापनीतत्वात् । अविद्याप्रतिबन्धमात्रो हि मोक्षो नान्यप्रतिबन्धः । नित्यत्वादात्मभूतत्वाच्च । तस्मात्—स यः कश्चिद्ध वै लोके तत्परमं ब्रह्म वेद साक्षादहमेवास्मीति स नान्यां गतिं गच्छति । देवैरपि तस्य ब्रह्मप्राप्तिं प्रति विघ्नो न शक्यते कर्तुम् । आत्मा ह्येषां स भवति । तस्माद्ब्रह्म विद्वान्ब्रह्मैव भवति । किञ्च नास्य विदुषोऽब्रह्मवित्कुले भवति । किञ्च तरति शोकमनेकेष्टवैकल्यनिमित्तं मानसं सन्तापं जीवन्नेवातिक्रान्तो भवति । तरति पाप्मानं धर्माधर्माख्यं गुहाग्रन्थिभ्यो हृदयाविद्याग्रन्थिभ्यो विमुक्तः सन्नमृतो भवतीत्युक्तमेव भिद्यते हृदयग्रन्थिरित्यादि ॥ ९ ॥

अथेदानीं ब्रह्मविद्यासम्प्रदानविध्युपप्रदर्शनेनोपसंहारः क्रियते—तदेतद्विद्यासम्प्रदानविधानमृचा मन्त्रेणाभ्युक्तमभिप्रकाशितम् । क्रियावन्तो यथोक्तकर्मानुष्ठानयुक्ताः । श्रोत्रिया ब्रह्मनिष्ठा अपरस्मिन्ब्रह्मण्यभियुक्ताः परब्रह्म बुभुत्सवः स्वयमेकर्षिमेकर्षिनामानमग्निं जुह्वते जुह्वति श्रद्धयन्तः श्रद्दधानाः सन्तो ये तेषामेव संस्कृतात्मनां पात्रभूताना-

---

अत्रैव ब्रह्मणि लयः अनिच्छताप्यङ्गीकार्यः, परमाणोः परममहति अन्तर्भावस्य प्रयत्नानपेक्षणात् । इत्थं च ज्ञानिनामेकीभावाय ब्रह्मलोकगमनमप्यनर्थकं स्यात् । एतेन देशविशेषं प्राप्य आविर्भूतब्रह्मरूपविशिष्टात्मनः इत्यादिकं चिन्त्यमेव । श्रुतिविरोधादत्रैव उपनिषदि ब्रह्मणि लयोक्तेश्च ।

१. पाप्मानमिति धर्मोऽप्यत्र पापमेव बन्धकत्वेन श्रेयोविरोधित्वात् । छान्दोग्ये—'न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते'—इत्यत्रोभयोरपि सुकृतदुष्कृतयोः पाप्मत्वेन परामर्शात् वेदान्ते यत्र यत्र पुण्यं पापं वोच्यते तत्रोभयोरपि ग्रहणमित्युक्तं भवति । गुहाग्रन्थयो हृदयस्थान्तःकरणगतकामादयो वासनादयश्च ।

२. गृहस्था ये अपरब्रह्मनिष्ठास्तेभ्य एवैतं ग्रन्थं पाठयेत् । ते च शिरोव्रतं शिरस्यग्निधारणमाचरितवन्त इति भाष्यम् । वादनक्षत्रमालायां भस्मरुद्राक्षधारणयोः सकलब्रह्मविद्याङ्गत्ववादे–स्कान्दे सौरसंहितावचनम्—

इदं शिरोव्रतं चीर्णं विधिवद्यैर्द्विजातिभिः । तेषामेव परां विद्यां वदेदज्ञानबाधिकाम् ॥
शिरोव्रतमिदं नाम शिरस्याथर्वणश्रुतौ । यदुक्तं तद्धि नान्यत्तत् तत्पाशुपतसंज्ञितम् ॥
शाखाभेदेषु नामानि तस्यास्य प्रविभेदतः । पठ्यते मुनिशार्दूल शाखास्वेकं व्रतं हि तत् ॥
अग्निरित्यादिभिर्मन्त्रैः षड्भिः शुद्धेन भस्मना । सर्वाङ्गोद्धूलनं कुर्यात् शिरोव्रतसमाह्वयम् ॥

ब्रह्मोत्तरखण्डेऽपि—

तेषामेव परं ज्ञानं संसारच्छेदकारणम् । उद्धूलनं त्रिपुण्ड्रं च मायापाशनिवृत्तये ॥
आमनन्ति मुनिश्रेष्ठा अथर्वशिरसि स्थितम् । अतोऽपि पापविच्छेदलाभाय ज्ञानसिद्धये ॥
उद्धूलनं त्रिपुण्ड्रं च मुमुक्षुः सर्वदाऽऽचरेत् ।

अयं चाध्ययनधर्मो न तु ज्ञानाङ्गम्, 'स्वाध्यायस्य तथात्वेन समाचारेऽधिकाराच्च सववच्च तन्नियम' इति सूत्रात् । (ब्र० सू० ३-३-३)

तदेतत्सत्यमृषिरङ्गिराः पुरोवाच नैतदचीर्णव्रतोऽधीते ।
नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥ ११ ॥

इति तृतीयमुण्डके द्वितीयः खण्डः

ॐ भद्रं कर्णेभिरिति शान्तिः ।

इत्थर्ववेदीया मुण्डकोपनिषत्समाप्ता ५

मेतां ब्रह्मविद्यां वदेत ब्रूयाच्छिरोव्रतं शिरस्यग्निधारणलक्षणम्। यथाऽऽथर्वणानां वेदव्रतं प्रसिद्धम्। यैस्तु यैश्च तच्चीर्णं विधिवद्यथाविधानं तेषामेव च ॥ १० ॥

तदेतदक्षरं पुरुषं सत्यमृषिरङ्गिरा नाम पुरा पूर्वं शौनकाय विधिवदुपसन्नाय पृष्टवत उवाच । तद्वदन्योऽपि तथैव श्रेयोर्थिने मुमुक्षवे मोक्षार्थं विधिवदुपसन्नाय ब्रूयादित्यर्थः । नैतद्ग्रन्थरूपमचीर्णव्रतोऽचरितव्रतोऽप्यधीते न पठति । चीर्णव्रतस्य हि विद्या फलाय संस्कृता भवतीति । समाप्ता ब्रह्मविद्या सा येभ्यो ब्रह्मादिभ्यः पारम्पर्यक्रमेण १० सम्प्राप्ता तेभ्यो नमः परमऋषिभ्यः । परमं ब्रह्म साक्षाद्दृष्टवन्तो ये ब्रह्मादयोऽवगतवन्तश्च ते परमर्षयस्तेभ्यो भूयोऽपि नमः । द्विर्वचनमत्यादरार्थं मुण्डकसमाप्त्यर्थं च ॥ ११ ॥

इति तृतीयमुण्डकोपनिषद्भाष्ये द्वितीयः खण्डः

इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवतः
कृतावाथर्वणमुण्डकोपनिषद्भाष्यं समाप्तम् १५

एतद्ग्रन्थद्वारकविद्याप्रदानेऽयं विधिराथर्वणिकानामिति प्रकृतपरामर्शकादेतच्छब्दादवगम्यते । ग्रन्थद्वारेण विद्यायाः प्रकृतत्वसम्भवान्न सर्वत्र ब्रह्मविद्यासम्प्रदाने इति सूचयन्नाह—**एतां ब्रह्मविद्यां वदेतेति** ॥ ९-१०-११ ॥

इति तृतीयमुण्डके द्वितीयः खण्डः

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दज्ञानविरचितं
मुण्डकोपनिषद्भाष्यव्याख्यानं समाप्तम् २०